RGVEDA DARSANA

A SET OF THIRTEEN VOLUMES

VOLUME FIVE

Vishnu Suktani

(Part One)

Vidyalankara

Prof S. K. Ramachandra Rao

Prof S. K. Ramachandra Rao Memorial Trust®

Bangalore 560 011

RgVeda Darsana, (A set of thirteen volumes) Volume Five, Vishnu Suktani, Part One, by Prof S. K. Ramachandra Rao, published by Dr. S. R. Sudarshan for Surama Prakashana, the publication wing of the Prof. S. K. Ramachandra Rao Memorial Trust®, 305, 6th Cross, 1st Block, Jayanagar, Bangalore 560011.

Phone: 080-26563957 E mail: profskr.trust@gmail.com

www.profskr.com

© Prof S. K. Ramachandra Rao Memorial Trust®

First Edition: 1999

Second Edition: 2015

ISBN 978-93-84069-15-5 (SET)

Introduction

Among the Suktas of Rg Veda, the ones that are most extensively used and that are philosophically most significant are those that have Vishnu and Indra as Devatas. Of the forty-five Suktas that are included here, there are Suktas which are ascribed to Indra and Vishnu together (Indra-Vishnu). The relatedness of Indra and Vishnu is an important issue in Vedic exegesis; its symbolism is very significant. The traditional interpretation focuses attention on this. The present volume seeks to present this point of view.

This volume also includes in the form of an appendix, a rare and important text, *'Rg Vidhana'*, which is of invaluable help in understanding the Vedic hymns.

S. K. Ramachandra Rao

CONTENTS

1. THE TEXT OF VISHṆU-SŪKTAS 1

2. EXCERPTS FROM SĀYAṆA-BHĀSHYA 12

3. EXCERPTS FROM ĀNANDA-TĪRTHA'S ṚG-BHĀSHYA 33

4. EXCERPTS FROM RĀGHAVENDRA TĪRTHA'S MANTRĀRTHA-MAÑJARI 37

5. INTRODUCTION TO SHAḌ-VAISHṆAVAM 39

6. SHAḌ-VAISHṆAVAM (1,22,16-21) 43

7. VISHṆU-SŪKTA (154,1-6) 125

8. INDRĀ-VISHṆU-SUKTA (1,155,1-6) 186

9. APPENDIX & ŚAUNAKA'S ṚGVIDHĀNA 240

ཨོཾ་ཧྲཱི་ཏ་བ་ཡ་ན་མཿ། ཨོཾ་ཧྲཱི་ཏ་བ་ཡ་ན་མཿ། ཨོཾ་ཧྲཱི་ཏ་བ་ཡ་ན་མཿ། ཨོཾ་ཧྲཱི་ཏ་བ་ཡ་ན་མཿ།

ཡ་ཏྲི་ཁཿ་ཨྲཱིཾ། ཡ་ཏྲི་ཁཿ་ཨྲཱིཾ། ཡ་ཏྲི་ཁཿ་ཨྲཱིཾ། ཡ་ཏྲི་ཁཿ་ཨྲཱིཾ། ཡ་ཏྲི་ཁཿ་ཨྲཱིཾ། ཡ་ཏྲི་ཁཿ་ཨྲཱིཾ།

I

विष्णुसूक्तानि ॥

THE TEXT

I maṇḍala 1, sūkta 22, mantras 16-21
(ashṭaka 1, adhyāya 2, varga 7)

II maṇḍala 1, sūkta 154, mantras 1-6
(ashṭaka 2, adhyāya 2, varga 24)

III maṇḍala 1, sūkta 155, mantras 1-6
(ashṭaka 2, adhyāya 2, varga 24)

IV maṇḍala 1, sūkta 156, mantras 1-5
(ashṭaka 2, adhyāya 2, varga 24)

V maṇḍala 6, sūkta 69, mantras 1-8
(ashṭaka 5, adhyāya 1, varga 13)

VI maṇḍala 7, sūkta 99, mantras 1-7
(ashṭaka 5, adhyāya 6, varga 24)

VII maṇḍala 7, sūkta 100, mantras 1-7
(ashṭaka 5, adhyāya 6, varga 24)



विष्णुसूक्तानि

I

(१।२२।१६-२१)

ऋषिः मेधातिथिः काण्वः ।

छन्दः गायत्री ।

देवता विष्णुः ॥

1. अतो॑ दे॒वा अ॑वन्तु नो॒
यतो॒ विष्णु॑र्विचक्र॒मे ।
पृ॒थि॒व्याः स॒प्त धाम॑भिः ॥ १६ ॥ (१)

2. इ॒दं विष्णु॒र्वि च॑क्रमे
त्रे॒धा नि द॑धे प॒दम् ।
समू॑ळ्हमस्य पांसु॒रे ॥ १७ ॥ (२)

3. त्रीणि॑ प॒दा वि च॑क्रमे॒
विष्णु॑र्गो॒पा अदा॑भ्यः ।
अतो॒ धर्मा॑णि धा॒रय॑न् ॥ १८ ॥ (३)

4. विष्णोः॒ कर्मा॑णि पश्यत॒
यतो॑ व्र॒तानि॑ पस्प॒शे ।
इन्द्र॑स्य॒ युज्यः॒ सखा॑ ॥ १९ ॥ (४)

5. तद्विष्णोः॑ पर॒मं प॒दं
सदा॑ पश्यन्ति सू॒रयः॑ ।
दि॒वी॑व॒ चक्षु॒रात॑तम् ॥ २० ॥ (५)

6. तद्विप्रा॑सो विप॒न्यवो॑
  जागृ॒वांस॒ः समि॑न्धते ।
विष्णो॒र्यत्प॑र॒मं प॒दम् ॥ २१ ॥ (६)

* * * * * * *

II

(१।१५४।१-६)

ऋषिः दीर्घतमा औचथ्यः ।
छन्दः त्रिष्टुप् ।
देवता विष्णुः ॥

7. विष्णो॒र्नु कं॑ वी॒र्या॑णि॒ प्र वो॑च॒म्
  यः पार्थि॑वानि विम॒मे रजां॑सि ।
यो अस्क॑भाय॒दुत्त॑रं स॒धस्थ॑म्
  विचक्रमा॒णस्त्रे॒धोरु॑गा॒यः ॥ १ ॥ (७)

8. प्र तद्विष्णु॑ः स्तवते वी॒र्ये॑ण
  मृ॒गो न भी॒मः कु॑च॒रो गि॑रि॒ष्ठाः ।
यस्यो॒रुषु॑ त्रि॒षु वि॒क्रम॑णेष्वधि
  क्षि॒यन्ति॒ भुव॑नानि॒ विश्वा॑ ॥ २॥ (८)

9. प्र विष्ण॑वे शू॒षमे॑तु मन्म॑ गिरि॒क्षित॑
  उरुगा॒याय॒ वृष्णे॑ ।
य इ॒दं दी॒र्घं प्रय॑तं स॒धस्थ॒मेको॑
  विम॒मे त्रि॒भिरित्प॒देभि॑ः ॥ ३ ॥ (९)

10. यस्य॒ त्री पू॒र्णा मधु॑ना प॒दान्यक्षी॑यमाणा
स्व॒धया॒ मद॑न्ति ।
य उ॑ त्रि॒धातु॑ पृथि॒वीमु॒त द्यामेको॑
दा॒धार॒ भुव॑नानि॒ विश्वा॑ ॥ ४ ॥ (१०)

11. तद॑स्य प्रि॒यम॒भि पाथो॑ अश्या॒म्
नरो॒ यत्र॑ देव॒यवो॒ मद॑न्ति ।
उ॒रु॒क्र॒मस्य॒ स हि बन्धु॑रि॒त्था
विष्णो॑: प॒दे प॑र॒मे मध्व॒ उत्स॑: ॥ ५ ॥(११)

12. ता वां॒ वास्तू॑न्युश्मसि॒ गम॑ध्यै॒ यत्र॒
गावो॒ भूरि॑शृङ्गा अ॒यास॑: ।
अत्राह॒ तदु॑रुगा॒यस्य॒ वृष्ण॑:
प॒रमं प॒दमव॑ भाति॒ भूरि॑ ॥ ६ ॥ (१२)

* * * * * * *

III

(१।१५५।१-६)

ऋषिः दीर्घतमाः औचथ्यः ।
छन्दः जगती ।
देवता इन्द्राविष्णू ।।

13. प्र व॒: पान्त॒मन्ध॑सो धियाय॒ते
म॒हे शूरा॑य॒ विष्ण॑वे चार्चत ।
या सानु॑नि॒ पर्व॑तानामदा॑भ्या-
म॒हस्त॒स्थतु॒रर्व॑तेव सा॒धुना॑ ॥ १ ॥ (१३)

14. त्वेषमित्था समरणं शिमीवतोरिन्द्रा-
विष्णू सुतपा वामुरुष्यति ।
या मर्त्याय प्रतिधीयमानमित्
कृशानोरस्तुरसनामुरुष्यथः ॥ २ ॥ (१४)

15. ता ईं वर्धन्ति मह्यस्य पौंस्यं नि
मातरा नयति रेतसे भुजे ।
दधाति पुत्रोऽवरं परं पितुर्नाम
तृतीयमधि रोचने दिवः ॥ ३ ॥ (१५)

16. तत्तदिदस्य पौंस्यं गृणीमसीनस्य
त्रातुरवृकस्य मीळ्हुषः ।
यः पार्थिवानि त्रिभिरिद्विगामभिरुरु
क्रमिष्टोरुगायाय जीवसे ॥ ४ ॥ (१६)

17. द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय
मर्त्यो भुरण्यति ।
तृतीयमस्य नकिरा दधर्षति वयश्चन
पतयन्तः पतत्रिणः ॥ ५ ॥ (१७)

18. चतुर्भिः साकं नवतिं च नामभिश्चक्रं
न वृत्तं व्यतीँरवीविपत् ।
बृहच्छरीरो विमिमान ऋक्वभिर्युवा-
कुमारः प्रत्येत्याहवम् ॥ ६ ॥ (१८)

* * * * * * *

IV

(१।१५६।१-५)

ऋषिः दीर्घतमाः औचथ्यः ।

छन्दः जगती ।

देवता विष्णुः ॥

19. भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न
एवया उ सप्रथाः ।
अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो
यज्ञश्च राध्यो हविष्मता ॥ १ ॥ (१९)

20. यः पूर्व्याय वेधसे नवीयसे सुमज्जानये
विष्णवे ददाशति ।
यो जातमस्य महतो महि ब्रवत्सेदु
श्रवोभिर्युज्यं चिदभ्यसत् ॥ २ ॥ (२०)

21. तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य
गर्भं जनुषा पिपर्तन ।
आस्य जानन्तो नाम चिद्विवक्तन
महस्ते विष्णो सुमतिं भजामहे ॥ ३ ॥ (२१)

22. तमस्य राजा वरुणस्तमश्विना क्रतुं
सचन्त मारुतस्य वेधसः ।
दाधार दक्षमुत्तममहर्विदं व्रजं च
विष्णुः सखिवाँ अपोर्णुते ॥ ४ ॥ (२२)

23. आ यो वि॒वाय॑ स॒चथा॑य॒ दैव्य॒
इन्द्रा॑य॒ विष्णुः॑ सु॒कृते॑ सु॒कृत्त॑रः।
वे॒धा अ॑जिन्वत् त्रिषध॒स्थ आर्य॑मृ॒तस्य॑
भा॒गे यज॑मान॒माभ॑जत्॥ ५॥ (२३)

* * * * * * *

V

(६।६९।१-८)

ऋषिः भरद्वाजः बार्हस्पत्यः।
छन्दः त्रिष्टुप्।
देवता इन्द्राविष्णू॥

24. सं वां॒ कर्म॑णा॒ समि॒षा हि॑नो॒मीन्द्रा॑विष्णू॒
अप॑सस्पा॒रे अ॒स्य।
जु॒षेथां॑ य॒ज्ञं द्रवि॑णं च धत्त॒मरि॑ष्टैर्नः
प॒थिभिः॑ पा॒रय॑न्ता॥ १॥ (२४)

25. या विश्वा॑सां जनि॒तारा॑ मती॒नामिन्द्रा॒विष्णू॑
क॒लशा॑ सोम॒धाना॑।
प्र वां॒ गिरः॑ श॒स्यमा॑ना अवन्तु॒ प्र
स्तोमा॑सो गी॒यमा॑नासो अ॒र्कैः॥ २॥ (२५)

26. इन्द्रा॑विष्णू मदपती मदाना॒मा सोमं॑
यातं॒ द्रवि॑णो॒ दधा॑ना।
सं वा॑मञ्जन्त्व॒क्तुभि॑र्मती॒नां सं
स्तोमा॑सः श॒स्यमा॑नास उ॒क्थैः॥ ३॥ (२६)

27. आ वामश्वासो अभिमातिषाह इन्द्राविष्णू
सधमादो वहन्तु ।
जुषेथां विश्वा हवना मतीनामुप
ब्रह्माणि शृणुतं गिरो मे ॥ ४ ॥ (२७)

28. इन्द्राविष्णू तत्पनयाय्यं वां सोमस्य
मद उरु चक्रमाथे ।
अकृणुतमन्तरिक्षं वरीयोऽप्रथतं
जीवसे नो रजांसि ॥ ५ ॥ (२८)

29. इन्द्राविष्णू हविषा वावृधानाग्राद्वाना
नमसा रातहव्या ।
घृतासुती द्रविणं धत्तमस्मे समुद्रः
स्थः कलशः सोमधानः ॥ ६ ॥ (२९)

30. इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य
दस्रा जठरं पृणेथाम् ।
आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि
शृणुतं हवं मे ॥ ७ ॥ (३०)

31. उभा जिग्यथुर्न परा जयेथे न परा
जिग्ये कतरश्चनैनोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा
सहस्रं वि तदैरयेथाम् ॥ ८ ॥ (३१)

* * * * * * *

VI

(७।९९।१-७)

ऋषिः वसिष्ठः मैत्रावरुणिः ।
छन्दः त्रिष्टुप् ।
देवता इन्द्राविष्णू ॥

32. परो मात्रया तन्वा वृधान न ते
महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या
विष्णो देव त्वं परमस्य वित्से ॥ १ ॥ (३२)

33. न ते विष्णो जायमानो न जातो
देव महिम्नः परमन्तमाप ।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ
प्राचीं ककुभं पृथिव्याः ॥ २ ॥ (३३)

34. इरावती धेनुमती हि भूतं सूयवसिनी
मनुषे दशस्या ।
व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ
पृथिवीमभितो मयूखैः ॥ ३ ॥ (३४)

35. उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता
सूर्यमुषासमग्निम् ।
दासस्य चिद्वृषशिप्रस्य माया
जघ्नथुर्नरा पृतनाज्येषु ॥ ४ ॥ (३५)

36. इन्द्राविष्णू दृंहिता शम्बरस्य नव पुरो
नवतिं च श्नथिष्टम्।
शतं वर्चिनः सहस्रं च साकं हथो
अप्रत्यसुरस्य वीरान्॥ ५॥ (३६)

37. इयं मनीषा बृहती बृहन्तोरुक्रमा
तवसा वर्धयन्ती।
ररे वां स्तोमं विदथेषु विष्णो
पिन्वतमिषो वृजनेष्विन्द्र॥ ६॥ (३७)

38. वषट् ते विष्णवास आ कृणोमि तन्मे
जुषस्व शिपिविष्ट हव्यम्।
वर्धन्तु त्वा सुष्टुतयो गिरो मे
यूयं पात स्वस्तिभिः सदा नः॥ ७॥(३८)

* * * * * * *

VII

(७।९९।१-७)

ऋषिः वसिष्ठः मैत्रावरुणिः।
छन्दः त्रिष्टुप्।
देवता विष्णुः॥

39. नू मर्तो दयते सनिष्यन्यो विष्णव
उरुगायाय दाशत्।
प्र यः सत्राचा मनसा यजात
एतावन्तं नर्यमाविवासात्॥ १॥ (३९)

40. त्वं विष्णो सुमतिं विश्वजन्याम-
प्रयुतामेवयावो मतिं दाः ।
पर्चो यथा नः सुवितस्य भूरेरश्वावतः
पुरुश्चन्द्रस्य रायः ॥ २ ॥ (४०)

41. त्रिर्देवः पृथिवीमेष एतां वि चक्रमे
शतर्चसं महित्वा ।
प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं
ह्यस्य स्थविरस्य नाम ॥ ३ ॥ (४१)

42. वि चक्रमे पृथिवीमेष एतां क्षेत्राय
विष्णुर्मनुषे दशस्यन् ।
ध्रुवासो अस्य कीरयो जनास उरुक्षितिं
सुजनिमा चकार ॥ ४ ॥ (४२)

43. प्र तत्ते अद्य शिपिविष्ट नामार्यः
शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य
रजसः पराके ॥ ५ ॥ (४३)

44. किमित्ते विष्णो परिचक्ष्यं भूत्प्र-
यद्ववक्षे शिपिविष्टो अस्मि ।
मा वर्पो अस्मदप गूह एतद्यदन्यरूपः
समिथे बभूथ ॥ ६ ॥ (४४)

45. वषट् ते विष्णवास आ कृणोमि तन्मे
जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे
यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ (४५)

* * * * * * *

II

EXCERPTS FROM SĀYAṆA - BHĀSHYA

1

(1,22,16)

विष्णुः परमेश्वरः । **सप्तधामभिः** सप्तभिर्गायत्र्यादिभिश्छन्दोभिः साधनभूतैः । **यतः** पृथिव्याः यस्माद् भूप्रदेशात् । **विचक्रमे** विविधं पादक्रमणं कृतवान् । **अतः** अस्मात्पृथिवीप्रदेशात् । **नः** अस्मान् । **देवाः अवन्तु**॥

विष्णोः पृथिव्यादिलोकेषु छन्दोभिः साधनैः जयं तैत्तिरीया आमनन्ति– ''विष्णुमुखा वै देवाश्छन्दोभिरिमांल्लोकानपजय्यमभ्यजयन्'' इति (तैत्तिरीयसंहितायां ५।२।१।१) ॥ विष्णोस्त्रिविक्रमावतारे पादत्रयक्रमणस्य पृथिव्यपादानम् ॥ पृथिवीप्रदेशाद्रक्षणं नाम भूलोके वर्तमानानां पापनिवारणम् ॥

2

(1,22,17)

विष्णुस्त्रिविक्रमावतारधारी । **इदं** प्रतीयमानं सर्वं जगदुद्दिश्य । **विचक्रमे** विशेषेण क्रमणं कृतवान् । तदा । **त्रेधा** त्रिभिः प्रकारैः । **पदं निदधे** स्वकीयं पादं प्रक्षिप्तवान् । **अस्य** विष्णोः । **पांसुरे** धूलियुक्ते पादस्थाने। **समूळ्हं** इदं सर्वं जगत् सम्यगन्तर्भूतम् ॥

सेयमृग् यास्केनैवं व्याख्याता– ''विष्णुर्विशतेर्वा व्यश्नोतेर्वा । यदिदं किञ्च तद्विक्रमते । विष्णुस्त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः । समारोहणे विष्णुपदे गयशिरसीति और्णवाभः। समूळ्हमस्य पांसुरेऽप्यायनेऽन्तरिक्षे पदं न दृश्यतेऽपि वोपमार्थे स्यात् । पांसुर एव पदं न दृश्यत इति पांसवः । पादैः सूयन्त इति वा पन्नाः शेरत इति वा । पांसनीया भवन्तीति वा'' (नि. १२।१९) ॥

3

(1,22,18)

अदाभ्यः केनापि हिंसितुमशक्यः । **गोपाः** सर्वस्य जगतो रक्षकः । **विष्णुः** । पृथिव्यादिस्थानेषु । **अत** एतेषु। **त्रीणि पदानि वि चक्रमे ।** किं कुर्वन्? **धर्माणि** अग्निहोत्रादीनि । **धारयन्** पोषयन् ।।

4

(1,22,19)

हे ऋत्विगादयः । **विष्णोः कर्माणि** पालनादीनि । **पश्यत । यतः** यैः कर्मभिः । **व्रतानि** अग्निहोत्रादीनि। **पस्पशे** सर्वो यजमानः स्पृष्टवान् । विष्णोरनुग्रहादनुतिष्ठतीत्यर्थः ।। तादृशो विष्णु**रिन्द्रस्य** । **युज्यो** योज्योऽनुकूलः **सखा** भवति । विष्णोरिन्द्रानुकूल्यं त्वष्टा हतपुत्र इत्यनुवाके ''अथ वै तर्हि विष्णुः'' इत्यादिना (तै.सं. २।४।१२,२) । प्रपञ्चेन तैत्तिरीया आमनन्ति ।।

5

(1,22,20)

सूरयो विद्वांसः ऋत्विगादयः । **विष्णोः** सम्बन्धि । **परमं** उत्कृष्टम् । तत् शास्त्रप्रसिद्धम् । **पदं** स्वर्गस्थानम्। शास्त्रदृष्ट्या सर्वदा पश्यन्ति तत्र दृष्टान्तः **दिवीव** । अकाशे यथा । **आ ततं** सर्वतः प्रसृतम् । **चक्षु**र्निरोधाभावेन विशदं पश्यति । तद्वत् ।।

6

(1,22,21)

पूर्वोक्तं **विष्णोः** । **यत् परमं पद**मस्ति तत् पदं । **विप्रासो** मेधाविनः । **समिन्धते** सम्यक् दीपयन्ति । कीदृशाः? **विपन्यवो** विशेषेण स्तोतारः । **जागृवांसः** शब्दार्थयोः प्रमादराहित्येन जागरूकाः ।।

7

(1, 154, 1)

हे नराः । **विष्णोः** व्यापनशीलस्य देवस्य । **वीर्याणि** वीरकर्माणि । **नु कं** इति शीघ्रं । **प्र वोचं** प्रब्रवीमि। अत्र यद्यपि नु कं इति पदद्वयम् । तथापि यास्केन ''नवोत्तराणि पदानि'' (नि. ३.१३) इत्युक्तत्वात् । शाखान्तर एकत्वेन पाठाच्च नु इत्येतस्मिन्नेवार्थे नु कमिति पदद्वयम् ।। तानि कानीति तत्राह । यो विष्णुः । **पार्थिवानि** पृथिवीसम्बन्धीनि । **रजांसि** रञ्जनात्मकानि । क्षित्यादिलोकत्रयाभिमानीन्यग्निवाय्वादित्य-रूपाणि रजांसि । **विममे** विशेषेण निर्ममे । अत्र त्रयो लोका अपि पृथिवीशब्दवाच्याः । तथा च मन्त्रान्तरम्–

'यदिन्द्राग्नी अवमस्यां पृथिव्यां
मध्यमस्यां परमस्यामुत स्थः ।'

(ऋ. १।१०८।९)

'योऽस्यां पृथिव्यामस्यायुषेत्युपक्रम्य यो द्वितीयस्यां तृतीयस्यां पृथिव्यामिति।' (तै.सं. १।२।१२।१)। तस्माल्लोकत्रयस्य पृथिवीशब्दवाच्यत्वम् ।।

किञ्च । यश्च विष्णुरुत्तरमुद्गततरं अतिविस्तीर्णं । सधस्थं सहस्थानम् । लोकत्रयाश्रयभूतं अन्तरिक्षम् । अस्काभयत् तेषामाधारत्वेन स्तम्भितवान्। निर्मितवान् इत्यर्थः । अनेनान्तरिक्षाश्रितं लोकत्रयमपि सृष्टवान् इत्युक्तंभवति । यद्वा । यो विष्णुः पार्थिवानि पृथिवीसम्बन्धीनि रजांसि पृथिव्या अधस्तनसप्तलोकान् । विममे विविधं निर्मितवान् । रजःशब्दो लोकवाची । 'लोका रजांस्युच्यन्ते' इति यास्केनोक्तत्वात् ।।

किञ्च । यश्चोत्तरं उद्गततरं उत्तरभाविनं । सधस्थं सहस्थानम् । पुण्यकृतां सहनिवासयोग्यं भूरादिलोकसप्तकम् । अस्कभायात् स्तम्भितवान् । सृष्टवानित्यर्थः ।।

अथवा पार्थिवानि पृथिवीनिमित्तकानि रजांसि लोकान् विममे । भूरादि लोकत्रयं इत्यर्थः । भूम्यां उपार्जित कर्मभोगार्थत्वात् इतरलोकानां तत्कारणत्वम् ।।

किञ्च । यश्च उत्तरं उत्कृष्टतरं सर्वेषां लोकानां उपरिभूतम् । अपुनरावृत्तेः तस्य उत्कृष्टत्वम् । सधस्थं उपासकानां सहस्थानं सत्यलोकं अस्काभयत् स्कम्भितवान् । ध्रुवं स्थापितवान् इत्यर्थः ।।

किं कुर्वन्? त्रेधा विचक्रमाणः त्रिप्रकारं स्वसृष्टांल्लोकान् विविधं क्रममाणः । विष्णोः त्रेधा क्रमणमिदं 'विष्णुर्विचक्रमे' (ऋ. १।२२।१७) इत्यादि श्रुतिषु प्रसिद्धम् ।।

अत एव **उरुगायः** । उरुभिः महद्भिः गीयमानः अतिप्रभूतं गीयमानो वा । य एवं कृतवान् तादृशस्य विष्णोः वीर्याणि प्रवोचम् ।।

8

(1, 154, 2)

यस्येति वक्ष्यमाणत्वात् स इति अवगम्यते । स महानुभावः । **वीर्येण** स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण। **स्तवते** स्तूयते सर्वैः । वीर्येण स्तूयमानत्वे दृष्टान्तः– **मृगो न सिंहादिरिव** । यथा स्वविरोधिनो मृगयिता सिंहो । **भीमो** भीतिजनकः । **कुचरः** कुत्सितहिंसादिकर्ता दुर्गप्रदेशगन्ता वा । **गिरिष्ठाः** पर्वताद्युन्नतप्रदेशस्थायी । सर्वै स्तूयते । अस्मिन्नर्थे निरुक्तम् (१,२०)–

> ''मृगो न भीमः कुचरो गिरिष्ठाः । मृग इव भीमः । कुचरो गिरिष्ठा मृगो मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्माद् भीष्मोऽप्येतस्मादेव । कुचर इति चरति कर्म कुत्सितमथ चेद्देवताभिधानं । क्वायं न चरतीति वा । गिरिष्ठा गिरिस्थायी । गिरिः पर्वतः । समुद्गीर्णो भवति पर्ववान् पर्वतः । पर्व पुनः पृणातेः प्रीणातेर्वा ।।''

इति । तद्द्वयमपि मृगोऽन्वेष्टा शत्रूणां **भीमो** भयानकः सर्वेषां भीत्यपादानभूतः । परमेश्वराद्भीतिः ''भीषास्माद्वातः पवते'' (तै.आ. ८।८।१) इत्यादि श्रुतिषु प्रसिद्धा । किञ्च । **कुचरः** शत्रुवधादि कुत्सितकर्मकर्ता । कुषु सर्वासु भूमिषु लोकत्रये सञ्चारी वा । तथा **गिरिष्ठा** गिरिवदुच्छ्रितलोकस्थायी । यद्वा । गिरिमन्त्रादिरूपायां वाचि सर्वदा वर्तमानः ।।

ईदृशोऽयं स्वमहिम्ना स्तूयते । किञ्च । यस्य विष्णोः । उरुषु विस्तीर्णेषु । त्रिसंख्याकेषु विक्रमणेषु पादप्रक्षेपेषु । विश्वा सर्वाणि । भुवनानि भूतजातानि । अधिक्षियन्ति आश्रित्य निवसन्ति । स विष्णुः स्तूयते ॥

9

(1, 154, 3)

विष्णवे सर्वव्यापकाय । **शूषं** अस्मत्कृत्यादि जन्यं बलं महत्त्वम् । **मन्म** मननं स्तोत्रं मननीयम् । शूषं बलं वा । विष्णुं एतु प्राप्नोतु ॥

कीदृशाय? **गिरिक्षिते** वाचि गिरिवदुन्नतप्रदेशे वा तिष्ठते । **उरुगायाय** बहुभिर्गीयमानाय । **वृष्णे** वर्षित्रे कामानाम् । एवं महानुभावं शूषं प्राप्नोतु ।

कोऽस्य विशेष इति उच्यते । **यो** विष्णुरिदं प्रसिद्धं दृश्यमानम् । **दीर्घं** अति विस्तृतं । **प्रयतं** नियतं । **सधस्थं** सहस्थानं लोकत्रयम् । **एक** इदेक एवाद्वितीयः सन् । **त्रिभिः** पदेभिः पादैः । **विममे** विशेषेण निर्मितवान् ॥

10

(1, 154, 4)

यस्य विष्णोः । **मधुना** मधुरेण दिव्येनामृतेन । **पूर्णा** पूर्णानि । **त्रीणि** पदानि पादप्रक्षेपणानि । **अक्षीयमाणा** अक्षीयमाणानि । **स्वधया** अन्नेन । **मदन्ति** मादयन्ति तदाश्रितजनान् । **य** उ य एव । **पृथिवीं** प्रख्यातां भूमिम् । **द्यां उत** द्योतनात्मकमन्तरिक्षं च । **विश्वा भुवनानि** सर्वाणि भूतजातानि चतुर्दशलोकांश्च ॥

यद्वा । पृथिवीशब्देन अधोवर्तीनि अतलवितलादि सप्त भुवनानि सर्वाण्यपि तत्रत्यानि भूतजातानि ॥

त्रिधातु । त्रयाणां धातूनां समाहारः त्रिधातु । पृथिव्यप्तेजोरूपधातुत्रयविशिष्टं यथा भवति तथा । **दाधार** धृतवान् । उत्पादितवान् इत्यर्थः । छन्दोगारण्यके (छां.उ. ६, २, ३) तत्तेजोऽसृजत । तदन्नमसृजत । ता आप ऐक्षन्तेति भूतत्रयसृष्टिमुक्त्वा हन्ताहमिमास्तिस्रो देवतास्तासां त्रिवृतं त्रिवृतमेकैकां करवाणीत्यादिना त्रिवृत्करणसृष्टिरुपपादिता ॥

यद्वा **त्रिधातु** कालत्रयं गुणत्रयं वा ॥ दाधारेत्यन्वयः ॥

11

(1, 154, 5)

अस्य महतो विष्णोः । **प्रियं** प्रियभूतम् । **तत्** सर्वैः सेव्यत्वेन प्रसिद्धं पाथः । अन्तरिक्षनामैतत् । 'पाथोऽन्तरिक्षं पथा व्याख्यातम्' इति यास्केनोक्तत्वात् (नि. ६।७) अविनश्वरं ब्रह्मलोकमित्यर्थः । **अश्यां** व्याप्नुयाम् । तदेव विशिष्यते– यत्र स्थाने । **देवयवो** देवं द्योतनस्वभावं विष्णुं आत्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तो नरः । **मदन्ति** तृप्तिमनुभवन्ति । तदश्यां इत्यन्वयः ।।

पुनरपि तदेव विशेष्यते । **उरुक्रमस्य** अत्यधिकं सर्वं जगदाक्रममाणस्य । तत्तदात्मना । अत एव विष्णोर्व्यापकस्य परमेश्वरस्य । **परमे** उत्कृष्टे निरतिशये केवलसुखात्मके । **पदे** स्थाने । **मध्वो** मधुरस्योत्सो निष्यन्दो वर्तते । तदश्याम् । यत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति, सङ्कल्पमात्रेणामृतकुल्यादि-भोगाः प्राप्यन्ते तादृशं इत्यर्थः ।।

ततोऽधिकं नास्तीत्याह । **इत्था** इत्थं उक्तप्रकारेण । **स हि बन्धुः** स खलु सर्वेषां सुकृतिनां बन्धुभूतो हितकरः वा । तस्य पदं प्राप्तवतां न पुनरावृत्तेः । 'न च पुनरावर्तते' इति श्रुतेस्तस्य बन्धुत्वम् । **हि**शब्दः सर्वश्रुतिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः ।।

12

(1, 154, 6)

हे पत्नीयजमानौ । **वां** युष्मदर्थम् । **ता** तानि, गन्तव्यत्वेन प्रसिद्धानि वस्तूनि, सुखनिवासयोग्यानि स्थानानि । **गमध्यै** युवयोः गमनाय । **उश्मसि** कामयामहे । तदर्थं विष्णुं प्रार्थयामः इत्यर्थः ।।

तानीत्युक्तं कानीत्याह । **यत्र** येषु वस्तुषु । **गावो** रश्मयः । **भूरिशृङ्गाः** अत्यन्तोन्नत्युपेता बहुभिराश्रयणीया वा । **अयासः** अयुना गन्तारोऽतिविस्तृताः । यद्वा यासो गन्तारः । अतादृशाः । अत्यन्तप्रकाशयुक्ताः इत्यर्थः ।।

अत्र आह। अत्र खलु वास्त्वाधारभूते द्युलोके उरुगायस्य बहुभिर्महात्मभिर्गातव्यस्य स्तुत्यस्य। वृष्णः कामानां वर्षितुः विष्णोः। तत् तादृशं सर्वत्र पुराणादिषु गन्तव्यत्वेन प्रसिद्धं। परमं निरतिशयम्। पदं स्थानम्। भूरि अतिप्रभूतमव भाति। स्वमहिम्ना स्फुरति ।।

अयं मन्त्रो यास्केन गोशब्दो रश्मिवाचक इति व्याचक्षाणेन व्याख्यातः। तानि वां वास्तूनि कामयामहे गमनाय। यत्र गावो भूरिशृङ्गा बहुशृङ्गाः। भूरीति बहुनो नामधेयं प्रभवतीति सतः। शृङ्गं श्रयतेर्वा, शृणातेर्वा, शम्नातेर्वा, शरणाय उद्गतमिति वा, शिरसो निर्गतमिति वा। अयासोऽयनाः। तत्र तदुरुगायस्य विष्णोः महागतेः। परमं पदं परार्घ्यस्थमवभाति भूरि। 'पादः पद्यतेः' (नि. २, ७) इति।

13

(1, 155, 1)

हे अध्वर्य्वादयः। **वो** युष्माकं सम्बन्धि। **पान्तं** पालनस्वभावम्। पातव्यं छान्दसः। **अन्धः** सोमरूपमन्नम्। **प्रार्चत** प्रकर्षेण सम्पादयत। कस्मै? **धियायते** स्तुतीरिच्छते। **महे** महते। **शूराय** विक्रान्ताय इन्द्राय। **विष्णवे** व्यापकाय एतन्नामकाय देवाय च। कस्तयोः अतिशय इति उच्यते। **यौ** याविन्द्राविष्णू। पर्वतानां प्रीणनवतां वा पर्वतशब्दो यास्केनैवं निरुक्तः। 'पर्ववान् पर्वतः, पर्व पुनः पृणातेः प्रीणातेर्वा' इति ।।

उक्तलक्षणानां लोकानां **सानुनि** समुच्छ्रितप्रदेशे। सर्वलोक इत्यर्थः। अथवा मेघानां समुच्छ्रितप्रदेशे। पर्वतशब्दो मेघनामसु उक्तत्वात् ।।

तत्र **तस्थतुः** तिष्ठतः। कीदृशौ तौ। **अदाभ्या**दम्भनीयौ परैः अनभिभाव्यौ। अत एव महान्तौ। यद्वा। महसि स्वतेजसि। सानुनि इत्यनेन सम्बन्धः। साधुनाभिमतदेशप्रापणसमर्थेनार्वता वेगवताऽश्वेनेव। तेन यथा अत्युच्छ्रितं प्रदेशमारोहति तद्वदुच्चं पदमारूढौ। तस्मात् ताभ्यां **अर्चत** ।।

14

(1, 155, 2)

हे इन्द्राविष्णू। **शिमीवतोः** अरिष्टप्रदानादि कर्मवतोः। **वां** युवयोः। **इत्था** इत्थम्। **त्वेषं** प्रदीप्तम्। समरणं सम्यग् यागदेशगमनम्। **सुतपा** हुतशिष्टसोमपीतयजमानः। **उरुष्यति** रक्षति। यागेन पूजयति ।।

यद्वा । **शिमीवतोः** प्रहरणादिकर्मवतोः । **वां** युवयोः । **त्वेषं** दीप्तं शौर्योपेतं । **समरणं** सम्यक्परस्परगमनोपेतं वृष्टिप्रदानाय मेघविदारणरूपम् । यजमानः । **उरुष्यति** रक्षति । स्तौतीत्यर्थः ॥

कस्तयोः अतिशयः इति उच्यते । **या** यौ इन्द्राविष्णू । **मर्त्याय** मनुष्याय हविर्दात्रे यजमानाय । प्रतिधीयमानमित् प्रतिधातव्यं फलरूपम् ॥ **असनां** असनं चलनशीलम् । प्रदानशीलमन्नादिकम् । **अस्तुः** अभिमतक्षेप्तुः, निरसितुः वा शत्रूणाम् । **कृशानोः** अग्नेः सकाशात् । **उरुष्यथः** अविच्छेदेन प्रवर्तयथः । वह्नौ हुतं हविः स्वीकृत्य तन्मुखादेव फलमपि दास्यथ इत्यर्थः ॥

15

(1, 155, 3)

ताः सोमरूपाः प्रसिद्धा आहुतयः । यजमानेन हुताः । **ईं** एतत् । **अस्य** इन्द्रस्य । **महि** महत् । **पौंस्यं** पुंसः कर्म । वक्ष्यमाणरूपं बलम् । **वर्धन्ति** वर्धयन्ति । **ईं** इत्यनर्थको वा । स च इन्द्रः सोमपानजनितं सामर्थ्यम् । **मातरा** द्यावापृथिव्यौ । **नि नयति** नितरां प्रापयति ॥

किमर्थं? **रेतसे** प्राणिनां पुत्राद्युत्पादनसामर्थ्याय । **भुजे** तेषां भोगाय रक्षणाय वा । कुत्र? इति तदुच्यते । **दिवो** द्योतमानस्य आदित्यस्य । **अधि** अधिकम् । **रोचने** रोचमाने मण्डले । **नाम** नमनम् द्यावापृथिव्योः स्थापितम् सामर्थ्यम् । **पुत्रः** पुरुत्राता सर्वो जनः । **पितुः** पालकाद्विष्णोः अनुग्रहात् ॥

यद्वा । **पितुः** स्वोत्पादकत्वात् स्वयं उत्पन्नं सत् । **अवरं** निकृष्टं नाम पौत्रसंज्ञम् । **परं** तदुत्कृष्टम् । **पुत्र** इति नाम । तदुभयापेक्षया तृतीय पितेति नाम । **दधाति** धारयति । "त्रीणि वाव रेतांसि पिता पुत्रः" इति श्रुतेः (तै.सं. ५।६।८।४) ॥

अस्यायमर्थः । अग्नौ हुताः सोमाहुतयः आदित्यमण्डलं प्राप्य द्वादशात्मनः सवितुः मूर्त्यन्तरौ इन्द्राविष्णू पोषयन्ति । तुष्टौ तौ मेघद्वारा वर्षतः । तया वृष्ट्या सस्यादिद्वारा प्रजाः पुत्रपौत्रादिरूपेण वर्धयतः । इत्येवं महानुभावौ इन्द्राविष्णू इति ॥

16

(1, 155, 4)

अस्य महानुभावस्य । **तत्** तत् । **पौंस्यं** पुंस्त्वं पराक्रमातिशयम् । **गृणीमसि** गृणीमः । स्तुमः । कीदृशस्य अस्य? **इनस्य** सर्वस्य स्वामिनः । **त्रातुः** पालकस्य । **अवृकस्य** वृको हिंसकः शत्र्वादिः, तद्रहितस्य । **मीळ्हुषः** सेक्तुः नित्यतरुणस्य । **स्तुत्येषु** पराक्रमेषु मध्य एकं उदाहरति ।।

यो विष्णुः । **पार्थिवानि** पृथिव्यादीनि, प्रथनवन्ति वा । सामर्थ्यात् रजांसि इति गम्यते । लोकत्रयस्यापि पृथिवीशब्दवाच्यत्वं पूर्वमुदाहृतम् । तानि । **त्रिभिः** इद् विगामभिः एव विविधगमनैः **उरु** विस्तीर्णं यथा भवति तथा । **क्रमिष्ट** क्रान्तवान् । विचक्रमे इत्यर्थः ।।

उरुगायाय उरुगातव्याय । जीवसे लोकत्रयरक्षणाय । यद्वा । **उरुगायाय** षष्ठ्यर्थे चतुर्थी । उरुगायस्य विष्णोः । ईदृशं पराक्रमम् । **गृणीमसि** । किमर्थम्? **जीवसे** जीवनाय रक्षणाय ।।

17

(1, 155, 5)

अस्य । **स्वर्दृशः** स्वर्गस्य सर्वस्य वा द्रष्टुः विष्णोः । **द्वे इत्** क्रमणे द्वे एव पदे । **मर्त्यो** मनुष्यः । **अभिख्याय** सर्वभूत्यादिना प्रख्याय । **भुरण्यति** गच्छति । भजते । भुरण्यतिः कण्ड्वादिर्गतिकर्मा । भुरण्यति शवतीति तत्कर्मसु पाठात् । प्रसिद्धत्वाद् भूलोकं वृष्ट्यागमनादन्तरिक्षं चेति उभे क्रमणे जानाति । अस्य विष्णोः तृतीयं क्रमणं द्युलोकाख्यं । कोऽपि मर्त्यः । **नकिः** नैव । **आ दधर्षति** बुद्ध्या नाभिभवति । ज्ञातुं न शक्नोतीत्यर्थः । न केवलं मनुष्य एव, अपि तु । **वयश्चन** वेतारो मरुतोऽपि ।।

कीदृशास्ते? **पतयन्तः** सर्वत्र गमनसमर्थाः । तथा । **पतत्रिणः** पतनशीला गरुडादयो वायवो वा । **नकिरा** दधर्षति । नैव शक्नुवन्ति । सत्यलोकस्य अत्यन्तविप्रकृष्टत्वेन सर्वेषां अविषयत्वादिति भावः ।।

18

(1, 155, 6)

अयं आदित्यात्मा विष्णुः । **चतुर्भिः** साकं सहितां **नवतिं** च । चतुर्नवतिमित्यर्थः । एतत्संख्याकान् कालावयवान् । **नामभिः** स्वकीयनमनप्रकारैः । प्रेरणविशेषैः वृत्तं यथा भवति तथा । **व्यतीन्** विविधातनस्वभावान् । **वृत्तं** चक्रम् । **न** बह्वरोपेतं चक्रमिव तं यथा शत्रोरुपरि प्रक्षेपेण भ्रमयति तद्वदुक्तसंख्याकान् कालावयवान् । **अवीविपत्** कम्पयति भ्रमयति ॥

के पुनस्ते? उच्यते । संवत्सर एकः । अयने द्वे । पञ्चर्तवः । द्वादश मासाः । चतुर्विंशत्यर्धमासाः । त्रिंशदहोरात्राः । अष्टौ यामाः । एकस्मिन् दिने पर्यावर्तमानानि मेषादीनि द्वादशलग्नानीति मिलित्वा चतुरधिकनवति संख्याकान् अवीविपत् ॥

ननु आदित्यः स्वयमपि इतरवत् परिभ्रमति, कथं भ्रमयति इत्युच्यते? नैष दोषः । एतेषां भ्रामकस्य ध्रुवस्य विष्णोः मूर्त्यन्तरत्वात् । अथवा स्वभ्रमणाधीनत्वादितरेषां परिभ्रमणस्य । अतः स्वयं भ्रमयतीत्युच्यते ॥

एवं कालात्मको विष्णुः । **बृहच्छरीरः** विराडात्मना सर्वदेवमनुष्यादि शरीराणां स्वशरीरत्वात् । बृहच्छरीरत्वमेव उपपादयति । **विमिमानः** विविधं आत्मानं मिमानः देवतिर्यगात्मना विभज्य स्थापयन् । यद्वा । **ऋकभिः** स्तुतिमद्भिः मन्त्रविद्भिर्वा । **विमिमानः** । यद्यपि विभुः तथापि भक्त्याधीनत्वात् स्तुत्या मीयते। **युवा** सर्वत्र मिश्रणशीलो नित्यतरुणो वा । अत एव **अकुमारः** अनल्पः ॥ एवंभूतो महाविष्णुः । **आहवं** आह्वानम् । **प्रत्येति** गच्छति यज्ञदेशम् ॥

19

(1, 156, 1)

हे विष्णो । **मित्रो** न । मितेर्दुःखात् त्राता सखा आदित्यो वा मित्रः । 'प्रमीतेस्त्रायते' इति निरुक्तम् (१०।२१) । तद्वत् **शेव्यः** सुखे साधुः सुखकर्ता । **घृतासुतिः** घृतं उदकं आसूयते येन स तादृशः । यद्वा । घृतं आज्यं आभिमुख्येन नीयते यस्मै स तादृशः ॥

विभूतद्युम्नः प्रभूतयशाः, प्रभूतान्नो वा । **एवया** रक्षणस्य मिश्रयिता प्रापयिता । **सप्रथाः** सर्वतः पृथुः । प्रतिविशेषणं नो भवेति सम्बन्धः । उ इति पादपूरणः ।।

हे विष्णो, त्वं यस्मादीदृशो भवसि । **अधाऽस्मात्ते** तव । **स्तोमः** स्तोत्रविशेषः । **विदुषा** त्वन्माहात्म्यवेदित्रा यजमानेन । **अर्घ्यः** पुनः पुनः प्रवर्धनार्हः । एकवारकरणे न सम्पूर्यत इत्यर्थः । तथा ते **यज्ञश्च हविष्मता** तेन यजमानेन । **राध्यः** समाराधनीयः । यद्वा । विदुषा होत्रा स्तोमो राध्यो हविष्मता यज्ञश्च राध्यः ।।

20

(1, 156, 2)

यः यो मर्त्यः । **पूर्व्याय** पूर्वकालीनाय । नित्याय इत्यर्थः । **वेधसे** विविधजगत्कर्त्रे । **नवीयसे** नित्यनूतनाय। अत्यन्तरमणीयाय इत्यर्थः । स्तुत्याय वा । **सुमज्जानये** स्वयमेवोत्पन्नाय । 'सुमत्स्वयं इत्यर्थः' इति यास्कः (नि. ६।२२) । यद्वा । सुतरां मादयतीति सुमत् । तादृशी जाया यस्य स तथोक्तः । तस्मै सर्वजगन्मादनशीलश्रीपतये इत्यर्थः ।।

उक्तगुणकाय **विष्णवे** व्यापकाय । **ददाशति** हविरादिकं ददाति । किञ्च, **अस्य** विष्णोः । **महतो** महानुभावस्य । **महि** महत् पूज्यम् । **जातं** जन्मोत्पत्तिं हिरण्यगर्भादिरूपं जन्म । **ब्रवत्** ब्रूयात् संकीर्तयेत् ।।

सोऽपि दाता स्तोता च । श्रवोभिः अन्नैः कीर्तिभिर्वा । युक्तः सन् । **युज्यं चित्** सर्वैर्गन्तव्यमेव । तत्पदं **अभि** आभिमुख्येन । **असत्** गच्छति प्राप्नोति ।।

21

(1, 156, 3)

हे स्तोतारः । **तमु** तमेव विष्णुम् । **पूर्व्यं** पूर्वार्हं अनादिसंसिद्धम् । **ऋतस्य गर्भं** यज्ञस्य गर्भभूतम् । यज्ञात्मनोत्पन्नं इत्यर्थः । 'यज्ञो वै विष्णुः' इति श्रुतेः (श.ब्रा. १।१।२।१३) । यद्वा । ऋतस्य उदकस्य । गर्भं गर्भकारणम् । उदकोत्पादकं इत्यर्थः । 'अप एव ससर्जादौ' इति स्मृतेः (मनु. १।८) ।।

एवंभूतं विष्णुं । यथा **विद** जानीथ । तथा **जनुषा** जन्मना । स्वत एव न केनचिद्धरलाभादिना । **पिपर्तन** स्तोत्रादिना प्रीणयत । यावदस्य माहात्म्यं जानीथ तावद् इत्यर्थः ।।

किञ्च **अस्य** महानुभावस्य विष्णोः । **नाम चित्** सर्वैः नमनीयं अभिधानं सार्वात्म्यप्रतिपादकं विष्णुरित्येतन्नाम । **जानन्तः** पुरुषार्थप्रदं इत्यधिगच्छन्तः । **आ** समन्तात् । **विवक्तन** वदत । संकीर्तयत ।। यद्वा । **नाम** यज्ञात्मना नमनं विष्णोरेव सर्वेषां स्वर्गापवर्गसाधनाय इष्टचाद्यात्मना द्रव्यदेवतात्मना वा परिणामं आजानन्तो यूयं विवक्तन ब्रूत ।।

इदानीं साक्षात्कृत्य आह । हे **विष्णो** सर्वात्मक देव । **महो** महतः । **ते** तव । **सुमतिं** सुष्टुतिम् शोभात्मिकां बुद्धिं वा । **भजामहे** सेवामहे वयं यजमानाः ।।

22

(1, 156, 4)

मारुतस्य । मरुतां ऋत्विजां संघातो मारुतं, तद्वतः । मरुतां देवानां सम्बन्धिनो वा । **वेधसो** मेधाविनः । अस्य यजमानस्य । **तं** प्रसिद्धम् । **क्रतुं** यागं यज्ञात्मकं विष्णुं । यज्ञो वै विष्णुरिति श्रुतेः । **राजा** राजमानः । **वरुणः । सचन्त** सेवते । तमेव क्रतुं यागम् । **अश्विना** अश्विनौ । सचेते । अन्येऽपि देवाः सचन्ते सेवन्ते ।।

किञ्च विष्णुः । सवनत्रयात्मना व्याप्तो विष्णुः । **सखिवान्** यजमानादि सखिभिर्युक्तः सन् । **उत्तमं** उत्कृष्टतमम् । **अहर्विदं** अहर्वेत्तारम् । **स्वर्गोत्पादकं** इत्यर्थः ।।

दक्षं बलम् । फलप्रदानसामर्थ्यरूपम् । **दाधार** धृतवान् । किञ्च **व्रजं** मेघं च । व्रज इति मेघनाम व्रजश्चरुरिति तन्नामसु पाठात् । तं वृष्ट्युदकायापोर्णुते अपगतावरणं करोति । आहुतिद्वारा यज्ञस्यैव वृष्ट्युत्पादकत्वात् । यद्वा । **मारुतस्य** मरुत्संघातस्य देवगणस्य । **वेधसो** विधातुः स्रष्टुः विष्णोः । **क्रतुं** कर्म पालनादिरूपम् । वरुणादयः । **सचन्ते,** तदधीनत्वात्पालनस्य । स च सखिवानिन्द्रमरुदादिसहायोपेतः सन् । उक्तलक्षणं दक्षं वृष्ट्युत्पादनादिसामर्थ्यरूपं बलं दाधार । तथा व्रजं च अपोर्णुते ।।

23

(1, 156, 5)

यो विष्णुः । **दैव्यो** दिवि भवः । **सुकृत्तरः** शोभनफलप्रदानां मध्ये श्रेष्ठः । **आ विवाय** आगच्छति । किमर्थम्? **सचथाय** सचनाय यागसहायकरणाय । कस्मै? **इन्द्राय** । इरां हविर्लक्षणान्नं द्रावयति इति इन्द्रः यजमानः । ''इन्द्र इरां दृणातीति इदं करणादित्याग्रायण'' इति यास्केनोक्तनिर्वचनस्य अत्रापि सद्भावात् (नि. १०।८) । तस्मा उक्तरूपाय यजमानाय । **सुकृते** शोभनस्तुतिकर्त्रे । आगत्य च **वेधा** अभिमतफलविधाता । **त्रिषधस्थः** त्रिसंख्योपेतसहस्थानवान् । सवनत्रयस्थानः क्षित्यादिस्थानत्रयो वा विष्णुः । **आर्यं** आगन्तव्यम् । यजमानं **अजिन्वत्** प्रीणयति । तदर्थं **अमृतस्य** यज्ञस्य । **भागे** हुतशेषरूपे । **तं** यजमानं । **आभजत** भजति । समीपयति इत्यर्थः । यद्वा **ऋतस्य** यज्ञस्य । भागे फले । **यजमानमाभजत् ।** स्वामित्वेन स्थापयति ॥

24

(6, 69, 1)

हे इन्द्राविष्णू । **वां** युवाम् । **कर्मणा** स्तोत्रेण । एषा **हविषा** च । **सं हिनोमि** सम्यक् प्रेरयामि । **अपसः** कर्मणः अस्य **उक्थस्य** । **पारे** समाप्तौ । यज्ञं **जुषेथां** सेवेथाम् । किञ्च । **अरिष्टैः** अनुपद्रवैः । **पथिभिः** मार्गैः । **नः** अस्मान् । **पारयन्ता** पारं नयन्तौ । युवां **द्रविणं** धनं धत्तं । अस्मभ्यं दत्तम् ॥

25

(6, 69, 2)

या यौ । प्रसिद्धौ इन्द्राविष्णू । **विश्वासां** सर्वासाम् । **मतीनां** स्तुतीनाम् । **जनितारा** जनितारौ । जन जनन इत्यस्माद्धातोस्तृचीदं रूपम् । यद्वा । जनी प्रादुर्भाव इत्यस्माद्धातोरेव तृचि जनिता मन्त्र इति निपातनाण्णिलोपः । **कलशा** कलशौ । **सोमधाना** सोमस्य निधानभूतौ च । स्याताम् ॥

अथ प्रत्यक्षस्तुतिः । हे । इन्द्राविष्णू । **वां** युवां । **शस्यमाना** उच्चार्यमाणाः शस्त्ररूपा । **गिरो** वाचः । **प्रावन्तु** प्राप्नुवन्तु । **अर्कैः** स्तोतृभिः । **गीयमानासो** गीयमानाः । **स्तोमासः** स्तोमाः स्तोत्राणि च । **प्रावन्तु** प्राप्नुवन्तु ॥

26

(6, 69, 3)

हे इन्द्राविष्णू। **मदानां** सोमानाम्। **मदपती** स्वामिनौ। मदपती इत्यत्र मदशब्दोऽनुवादः। **द्रविणो** द्रविणानि धनान्यपि। **द्रविणा उ** इति पदद्वयं एकीभूय द्रविणो इति पदं निष्पन्नम्॥

दधाना ददानौ। **युवां** सोममभ्यायातम्। **मतीनां** स्तोतॄणाम्। **स्तोमासः** स्तोत्राणि। **उक्थैः** शस्त्रैः सार्धम्। **शस्यमानासः** उच्चार्यमाणाः। वां युवाम्। **अक्तुभिः** तेजोभिः। **समञ्जन्तु** समर्धयन्तु। **सं समिति** द्विरुक्तिरादरार्था॥

27

(6, 69, 4)

हे इन्द्राविष्णू। **वां** युवाम्। **अभिमातिषाहः** अभिमातीनां हिंसकानां अभिभवितारः। **सधमादः** सह माद्यन्तः। अश्वासः अश्वाः। **आ** वहन्तु। **मतीनां** स्तोतॄणाम्। **विश्वा** विश्वानि। **हवना** हवनानि स्तोत्राणि। **जुषेथां** सेवेथाम्। तदर्थं **मे** मदीयानि। **ब्रह्माणि** स्तोत्राणि। **गिरः** शस्त्ररूपा वाचः। उप **श्रुणुतम्**॥

28

(6, 69, 5)

हे इन्द्राविष्णू। **वां** युवयोः। **तत्** कर्म। **पनयाय्यं** स्तुत्यम्। किं तत्कर्म? इत्यत आह। सोमस्य मदे सति। **यद् उरु** विस्तीर्णम्। **चक्रमाथे** विचक्रमाथे। यद्यपि विष्णोरेव विक्रमः तथापि एकार्थत्वाद् उभयोः इति उच्यते। यच्च अन्तरिक्षं **वरीयः** उरुतरम्। **अकृणुतं** अकुरुतम्। यदपि च **रजांसि** लोकान् सर्वान्। 'लोका रजांस्युच्यन्ते' इति यास्कः। **नः** अस्माकम्। **जीवसे** जीवनाय। **अप्रथतं** अप्रथयतम्॥

29

(6, 69, 6)

घृतासुती घृतान्नौ इन्द्राविष्णू । **युवाम्** । **हविषा** सोमेन । **वावृधाना** वर्धमाना । **अग्र अद्वाना** सोमाग्रस्य शुक्रस्य अत्तारौ । **नमसा** नमस्कारेण । **रातहव्या** दत्तहविष्कौ यजमानैः । **अस्मे** अस्मभ्यम् । **द्रविणं** धनम् । **धत्तं** प्रयच्छतम् । किञ्च युवां । **समुद्र** उदधिरिव । **स्थः** भवथः । यतः सोमधानः सोमनिधानः कलशो भवथः ॥

30

(6, 69, 7)

दस्रा हे दर्शनीयौ इन्द्राविष्णू । युवाम् । **मध्वः अस्य** मदकरं इमम् । **सोमस्य** सोमम् । पिबतम् । किञ्च **जठरं** उदरम् । **पृणेथां** सोमेन पूरयेथाम् । हे इन्द्राविष्णू । **वां** युवाम् । मदिराणि मदकराणि । **अन्धांसि** सोमात्मकानि अन्नानि । **अग्मन्** अभिगच्छन्तु । **मे** मदीयानि । **ब्रह्माणि** स्तोत्राणि । **हवं** मदीयं आह्वानम् च । **उपश्रुणुतम्** ॥

31

(6, 69, 8)

हे इन्द्राविष्णू । **उभा** उभौ । युवां **जिग्यथुः** शत्रून् अजैष्टम् । **न परा** जयेथे । न पुनः कदाचन पराजयेथे । **एनोः** एनयोः । युवयोः मध्ये । **कतरश्चन** एकतरोऽपि । न परा **जिग्ये** न पराजैष्ट । हे **विष्णो इन्द्रश्च** । त्वं च युवाम् । यद्यद्वस्तु । प्रति **अपस्पृधेथां** असुरैः सह अस्पृधेथाम् । **त्रेधा** लोक-वेद-वागात्मना त्रिधा स्थितम् । सहस्रं अमितम् च । **वि तदैरयेथाम्** व्यक्रमेथां इत्यर्थः ॥

तथा च ब्राह्मणम् (ऐ.ब्रा. ६।१५) ।

> ''उभा जिग्यथुरित्यच्छावाकस्योभौ हि तौ जिग्यतुर्न परा जयेथे न परा जिग्य इति । न हि तयोः कतरश्चन पराजिग्य इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं

वि तदैरयेथां इतीन्द्रश्च ह वै विष्णुश्चासुरैर्युयुधाते । तान् ह स्म जित्वोचतुः 'कल्पामहै' इति । ते ह तथेत्यसुरा ऊचुः । सोऽब्रवीदिन्द्रो 'यावदेवायं विष्णुस्त्रिर्विक्रमते तावदस्माकमथ युष्माकमितरद्' इति । स इमांल्लोकान् विचक्रमेऽथो वेदानथो वाचम् । तदाहुः किं तत्सहस्रमितीमे लोका इमे वेदा अथो वागिति ब्रूयादैरयेथामैरयेथाम् ।।''

यद्वा । **तत् सहस्रं** गवां सहस्रम् । **त्रेधा** व्यैरयेथां इत्यर्थः ।।

32

(7, 99, 1)

पर इति सकारान्तं परस्तादित्यस्यार्थे । परशब्दश्छान्दसोऽसि प्रत्ययः । 'परो दिवा पर एना पृथिव्या' (ऋ. १०।८२।५) इति यथा । मात्रया इति व्यत्ययेन तृतीया । **मात्रया परः** परस्ताद्वर्तमानयाऽपरिमितया । **तन्वा** शरीरेण । **वृधान** वर्धमान । हे **विष्णो** । **ते** तव । **महित्वं** महत्त्वम् । **न अन्वश्नुवन्ति** न अनुव्याप्नुवन्ति । त्रैविक्रमसमये यत्तव माहात्म्यं तत्सर्वैरपि जनैः ज्ञातुं न शक्यते इत्यर्थः ।

ते तव । **उभे रजसी** उभौ लोकौ । **पृथिव्या** आरभ्य पृथिवीं अन्तरिक्षं च । **विद्म** जानीमः । वयं चक्षुषा उपलभामहे न अन्यत् । हे **देव** द्योतमान । **विष्णो** । **त्वमेव** । **परमस्य** स्वर्गादिरुत्कृष्टलोकस्य । द्वितीयार्थे षष्ठी । परमं लोकम् । **वित्से** जानासि । अतस्तव महत्त्वं न केनापि व्याप्तुं शक्यमिति भावः ।।

33

(7, 99, 2)

हे **देव** दानादिगुणयुक्त । **विष्णो** । **ते** तव । **महिम्नो** महत्त्वस्य । **परं** विप्रकृष्टम् । **अन्तं** अवसानम् । **जायमानः** प्रादुर्भवन् जनः । **नाप** न प्राप्नोति । तथा **जातः** प्रादुर्भूतोऽपि जनः । नैव प्राप्नोति । तव महत्त्वस्य अवसानं नास्ति । अत एव सर्वैः न ज्ञायते इति भावः ।।

कोऽसौ महिमा? तमाह। **ऋष्वं** दर्शनीयम्। **बृहन्तं** महान्तम्। **नाकं** द्युलोकम्। **उदस्तभ्नाः** त्वं ऊर्ध्वं अधारयः। यथाधो न पतति तथा। **पृथिव्याः** भूमेः सम्बन्धिनीम्। **प्राचीं ककुभं** च **दाधर्थ** धारितवानसि। उपलक्षणमेतत् सर्वस्य भूतजातस्य। तथा च मन्त्रान्तरम् (ऋ.१।१५४।४१)–

''य उ त्रिधातु पृथिवीमुत द्यां
एको दाधार भुवनानि विश्वा ॥''

34

(7, 99, 3)

हे द्यावापृथिव्यौ। **मनुषे** स्तवते मनुष्याय। **दशस्या** दित्सया युक्ते। युवां **इरावती** अन्नवत्यौ। **धेनुमती** गोमत्यौ। **सूयवसिनी** शोभनयवसे च। **भूतं** अभूतम्। **हि** शब्दः प्रसिद्धौ। विष्णुना विक्रान्तत्वात् युवां एवमेव खलु पूर्वमभूतं इत्यर्थः ॥

हे **विष्णो**। **एते** इमे। **रोदसी** द्यावापृथिव्यौ। **व्यस्तभ्नाः** विविधं अवधारयः। पृथिवीमूर्ध्वमुखत्वेन द्यामधोमुखत्वेनेति विविधत्वम्। अपि च। **पृथिवीं** प्रथितां इमां भूमिम्। **अभितः** सर्वत्र स्थितैः। **मयूखैः** पर्वतैः। **दादर्थ** धारितवानसि। यथा न चलति तथा दृढीकृतवान् इत्यर्थः ॥

पर्वता हि विष्णोः स्वभूताः। ''विष्णुः पर्वतानामधिपतिः'' इति श्रुतेः (तै.सं. ३।४।५।१)

35

(7, 99, 4)

हे इन्द्राविष्णू। **यज्ञाय** यजमानाय। **उरुं** विस्तीर्णम्। **लोकं** स्वर्गाख्यम्। **चक्रथुः** उ कृतवन्तौ खलु युवाम्। किं कुर्वन्तौ? **सूर्यं** सर्वस्य प्रेरकं आदित्यम्। **उषसं** तमोनिवारकं उषःकालं। **अग्निं** च। असुरैः आवृतं। **जनयन्तौ** पुनः प्रादुर्भावयन्तौ। हे **नरा** नेतारौ इन्द्राविष्णू। **वृषशिप्रस्य** एतत् संज्ञस्य। **दासस्य चित्** उपक्षपयितुः असुरस्य। **मायाः**। **पृतनाज्येषु** संग्रामेषु। **जघ्नथुः** जिहिंसथुः ॥

युवां सूर्यादिकं जनयन्तौ इति उच्यते ॥

36

(7, 99, 5)

हे **इन्द्राविष्णू** । **दृंहिताः** दृढीकृताः । **नव नवतिं च** नवोत्तरनवतिसंख्याकाः । **पुरः** पुराणि । **शम्बरस्य** स्वभूतानि । **श्नथिष्टं** अहिंसिष्टम् । श्नथ हिंसायाम् ॥

अपि च । **शतं सहस्रं** च । **वर्चिनः** असुरस्य वीरान् अप्रतिद्वन्द्विनः यथा न भवन्ति तथा । **साकं** सह । सद्य एव । **हथः** अहिंसिष्टम् ॥

''यो वर्चिनः शतमिन्द्रः सहस्रं'' इति हि निगमान्तरम् (ऋ. २।१४।६)।

37

(7, 99, 6)

बृहती महती । **इयं मनीषा** मननीया स्तुतिः । **बृहन्ता** बृहन्तौ महान्तौ । **उरुक्रमा** विस्तीर्णविक्रमौ । विष्णुना सह एकार्थीभावात् इन्द्रस्यापि उरुक्रमत्वम् । **तवसा** तव इति बलस्य बुद्धेर्वा नामधेयम्, तद्वन्तौ । एवंभूतौ युवां । **वर्धयन्ती** प्रवृद्धौ कुर्वत्यस्माभिः कृता । हे **विष्णो**, हे **इन्द्र** । **विदथेषु** यज्ञेषु । **वां** युवाभ्याम् । **स्तोमं** उक्तलक्षणं स्तोत्रम् । **ररे** ददे । रा दाने इति धातुः । तौ युवां । **वृजनेषु इषः** अन्नानि । **पिन्वतं** अस्मभ्यं वर्धयतम् ॥

38

(7, 99, 7)

हे **विष्णो** । **ते** तुभ्यम् । **आसः** आस्यादभिमुखम् । **वषट्** । **कृणोमि** करोमि । वषट्कारेण हविः हावयामि । हे **शिपिविष्ट**, शिपयो रश्मयः, तैराविष्टः विष्णो । **तत्** वषट्कृतम् । **मे** मदीयम् । **हव्यं** हविः । **जुषस्व** सेवस्व ॥

सुष्टुतयः शोभनस्तुत्यात्मिकाः । **गिरः** वाचश्च । **त्वां** । **वर्धन्तु** वर्धयन्तु । अन्यद्गतम् ॥

39

(7, 100, 1)

स **मर्तो** मनुष्यः। **सनिष्यन्** धनमिच्छन्। **नु** क्षिप्रम्। **दयते** धनं आदत्ते। यो मनुष्यः। **उरुगायाय** बहुभिः कीर्तनीयाय। **विष्णवे**। **दाशत्** हवींषि दद्यात्। **यः** च **सत्राचा** सहंचता। **मनसा** मननेन स्तोत्रेण। **प्र यजाते** प्रकर्षेण पूजयेत्। **एतावन्तं** एतावत्परिमाणं महान्तम्। **नर्यं** नरेभ्यो हितम्। विष्णुं। **आविवासात्** नमस्कारादिभिः परिचरेत्। स **मर्तो दयत** इत्यन्वयः ॥

स मर्तः सनिष्यन् धनादीनि लप्स्यमानो भवन्नेव हविरादिकं नु क्षिप्रं दयते विष्णवे ददातीति योज्यम् ॥

40

(7, 100, 2)

हे **एवयावः**। एवा प्राप्तव्याः कामाः। तान् यापयति प्रापयति स्तोतॄन् इति एवयावः। हे एवयावन् **विष्णो**। त्वं विश्वजन्यां सर्वजनहिताम्। दोषैः वियुक्ताम्। **सुमतिं** अनुग्रहबुद्धिम्। **दाः** अस्मभ्यं देहि। **सुवितस्य** सुष्ठु प्राप्तव्यस्य। **भूरेः** बहुलस्य। **अश्वावतः** अश्वयुक्तस्य। **पुरुश्चन्द्रस्य** पुरूणां बहूनां आह्लादकस्य। **रायः** धनस्य। **पर्चः** संपर्कः। **नः** अस्माकम्। यथा भवति तथा देहि इत्यन्वयः ॥

41

(7, 100, 3)

एष **देवः** दानादिगुणयुक्तो विष्णुः। **शतर्चसं** शतसंख्यानि अर्चींषि यस्याः तादृशीं एतां पृथिवीम्। उपलक्षणमेतत्। पृथिव्यादीन् त्रिलोकान्। **महित्वा** महत्त्वेन। **त्रिः विचक्रमे** त्रिभिः पादैः विक्रान्तवान्। **तवसः** तवस्विनः वृद्धादपि। **तवीयान्** तवस्वितरो विष्णुः। **प्र अस्तु** अस्माकं प्रभवतु। स्वामी भवतु। **अस्य स्थविरस्य** वृद्धस्य विष्णोः। **नाम** नामकं रूपम्। विष्णुः इति एतन्नामैव वा। **त्वेषं हि** यस्माद्दीप्तं तस्मात्कारणात् स विष्णुः प्रभवतु इत्यर्थः ॥

42

(7, 100, 4)

एष देवो **विष्णुः** । **एतां** पृथिवीम् । पृथिव्यादीन् इमांस्त्रीँल्लोकान् । **क्षेत्राय** निवासार्थम् । **मनुषे** स्तुवते देवगणाय । **दशस्यन्** असुरेभ्योऽपहृत्य प्रदास्यन् । **वि चक्रमे** विक्रान्तवान् । **अस्य** च विष्णोः । **कीरयः** स्तोतारः । **जनासः** जनाः । **ध्रुवासः** निश्चला भवन्ति । ऐहिकामुष्मिकयोः लाभेन स्थिरा भवन्ति इत्यर्थः ॥

सुजनिमा शोभनानि जनिमानि कीर्तनस्मरणादिना सुखहेतुभूतानि । यस्य तादृशो **विष्णुः** । **उरुक्षितं** विस्तीर्णनिवासम् । **चकार** स्तोतृभ्यः करोति ॥

43

(7, 100, 5)

हे **शिपिविष्ट** रश्मिभिः आविष्ट विष्णो । **ते** तव । **तत्** प्रसिद्धम् । विष्णुरिति प्रख्यातं **नाम** । **आर्यः** स्वामी स्तुतीनां हविषां वा । तथा **वयुनानि** ज्ञातव्यानि अर्थजातानि । **विद्वान्** जानन् । अहं **अद्य** इदानीम् । प्र शंसामि प्रकर्षेण स्तौमि । **तवसं** प्रवृद्धम् । **तं** / **त्वा** त्वां विष्णुम् । **अतव्यान्** अतवीयान् अवृद्धतरोऽहं । **गृणामि** स्तौमि ॥

कीदृशं? **अस्य रजसः** लोकस्य । **पराके** दूरदेशे । **क्षयन्तं** निवसन्तम् ॥

44

(7, 100, 6)

पुरा खलु विष्णुः स्वं रूपं परित्यज्य कृत्रिमं रूपान्तरं धारयन् संग्रामे वसिष्ठस्य साहाय्यं चकार । तं जानन् ऋषिः अनया प्रत्याचष्टे । अत्र निरुक्तम् (५।८) ।–

> ''शिपिविष्टो विष्णुरिति विष्णोः द्वे नामनी भवतः । कुत्सितार्थीयं पूर्वं भवति इति औपमन्यवः । किं ते विष्णो प्रख्यातमेतद् भवत्यप्रख्यापनीयं यन्नः प्रब्रूषे शेप निर्वेष्टितोऽस्मीत्यप्रतिपन्नरश्मिः । अपि वा प्रशंसानामैव अभिप्रेतं स्यात् ।

किं ते **विष्णो** प्रख्यातमेतद् भवति प्रख्यापनीयं यदुत प्रब्रूषे शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः। शिपयोऽत्र रश्मय उच्यन्ते। तैराविष्टो भवति। मा वर्पो अस्मदप गूह एतत्। वर्प इति रूपनाम। वृणोतीति सतः। यदन्यरूपः समिथे संग्रामे भवसि संयतरश्मिः'' इति ॥

(१) तत्र कुत्सितार्थपक्षे योजना। हे **विष्णो**। **ते** तव। तन्नाम **किं परिचक्ष्यं** प्रख्यापनीयम्। **भूत्** भवति। किंशब्दः क्षेपे। अप्रख्यापनीयमेव तद् भवति। यन्नाम अस्मभ्यं। **प्र ववक्षे** प्रब्रूषे। शिपिविष्टोऽस्मीति। अन्तर्णीतोपमानं एतत्। शेप इव निर्वेष्टितः तेजसा अनाच्छादितो भवामि इति। तदश्लीलार्थत्वात् इदं नाम न प्रशस्तं इत्यर्थः। तन्नाम किं **परिचक्ष्यं** वर्जनीयं परित्याज्यम्। विरुद्धार्थप्रतिपादकत्वात् स्वत एव परित्यक्तं हि तत्। शिष्टं समानं पूर्वेण।

अत उक्तरूपविलक्षणं यद् वैष्णवरूपं अस्ति **एतद् वर्पः** रूपम्। **अस्मत्** अस्माकं। **मा अप गूहः,** अपगूढं संवृतं मा कुरु। गुहू संवरणे। अपि तु तदेव रूपं प्रकटय। वैष्णवस्य रूपस्य गूहने का प्रसक्तिः? इति चेत्। यदि अस्मात् **अन्यरूपः** रूपान्तरमेव धारयन्। **समिथे** संग्रामे। **बभूथ** अस्माकं सहायो भवसि तस्मादिदं गूहनं न कार्यं इति ॥

(२) प्रशंसापक्षे तु। हे **विष्णो**। तव तन्नाम किं परिचक्ष्यं भूत्। किं प्रख्यापनीयं भवति। न प्रख्यापनीयम्। किं तन्नाम? **शिपिविष्टो** रश्मिभिराविष्टः अस्मि इति यन्नाम प्रब्रूषे। यत एवं प्रख्यातरूपः त्वं, अतो अस्माकं एतद्वैष्णवं रूपं संवृतं मा कार्षीः। इदानीं गूढरूपोऽपि यद्यस्मात् त्वं। **समिथे** संग्रामे। **अन्यरूपः** कृत्रिमरूपं। यदन्यद् वैष्णवं रूपं शौर्यादिलक्षणं तादृग्रूप एव। **बभूथ** भवसि। तस्मात् त्वं गूढः अपि ज्ञायसे एव इति व्यर्थमेव तस्य रूपस्य गूहनम्। अतो बहुतेजस्कं यद्वैष्णवं रूपं तदस्माकं प्रदर्शय इति तात्पर्यार्थः ॥

45

(7, 100, 7)

व्याख्यातेयम् (ऋ. ६, ९९, ७)। अक्षरार्थस्तु। हे **विष्णो**। तुभ्यं आस्यात् आस्येन वषट् करोमि। वषट् कृतं तन्मदीयं हविः हे शिपिविष्ट सेवस्व। शोभनस्तुतिरूपा मदीया वाचश्च त्वां वर्धन्तु इति। शिष्टः पादः सिद्धः ॥

III

EXCERPTS FROM ĀNANDA-TĪRTHA'S ṚG-BHĀSHYA

(with Jaya-tīrtha's gloss)

1

(1, 22, 16)

असुरेभ्यो जगद् धृत्वा यतो विष्णुस्त्रिविक्रमैः ।
आरभ्य पृथिवीं सप्तलोकैः साकं जगत्पतिः ।
चक्रे सुरान् पदस्थानप्यतो देवा अवन्तु नः ॥

(**यतः** कारणात् । त्रिभिः क्रमैः पादविक्षेपैः । इदमिति वक्ष्यमाणं जगत् । **वि चक्रमे** असुरेभ्यो जहारेति यावत् । हृत्वा च सुरान् स्वस्वपदस्थानपि चक्रे इति शेषः । अतः एवं विष्णुप्रसादाल्लब्धपदत्वेन समर्थत्वात् । **देवाः अस्मन्** रक्षन्तु ॥)

विशिष्टबलचेष्टत्वाद् विष्णुरित्यभिधा हरेः ।
प्राणं बलं षकारं च णकारं चाह च श्रुतिः ॥

(विष्णुशब्दं भगवति निर्वक्ति । भवतु विशब्दो विशिष्टवाची षकार-णकारयोस्तु चेष्टाबलवाचित्वं कुत इत्यत आह । प्राणमिति । परमेश्वरस्य प्राणं चेष्टां षकारं षशब्देनाक्रियमाणं बलं च णकारं णशब्देनाक्रियमाणमाहेत्यर्थः । श्रुतिः णकारो बलं षकारः प्राण आत्मेत्येषा ॥)

2

(1, 22, 17)

रमन्ति पांसवो यत्र पांसुरं पदमीरितम् ।
समूढं तत्र विश्वं हि पांसुवं जगतः पतेः ॥

(रमन्ति शोभन्ते। यद्वा। पांसुशब्देन तदाश्रिता देवा विवक्षिताः। समूढमित्यनेन **समूळ्ह**मित्येतद्वहते रूपमित्युक्तं भवति। प्रापितमित्यर्थः। अत्रापि इदमिति सम्बध्यते। इत्यतो विश्वमित्युक्तम्। पद इत्यनुत्त्वा **पांसुर** इत्युक्तस्य तात्पर्यमाह। पांसुवमिति। **विष्णु**र्भगवान् **इदं** विश्वं **विचक्रमे** विक्रान्तवान्। कथं? त्रेधा **पदं नि दधे**। तदाऽस्य जगतः पतेः। पांसुरे पदे। **इदं** विश्वं समूळ्हं प्रविष्टमिति (प्रतिष्ठितमिति) यावत्॥)

3

(1, 22, 18)

वेदान् कालान् गुणांल्लोकान् देवमानुषदानवान्।
चेतनाचेतनान्मिश्रांस्त्रीणि पदा विचक्रमे॥
रक्षकत्वेन सर्वाणि स्रष्टृभर्तृत्वतस्तथा।
मोक्षदत्वेन च विभुः स्तम्भनीयो न केनचित्।
धारकांश्चैव वाय्वादीन् धारयन् वर्तते ततः॥

(**विष्णुः त्रीणि पदा**। सर्वाणि त्रिविधानि पदानि। स्वरूपाणि। **विक्रमते** अतिक्रान्तः। कानि तानि? वेदांस्त्रीन्। कालानतीतानागतवर्तमानान्। गुणान् सत्त्वादीं ल्लोकान् भूर्भुवः स्वराख्यान्। देवमानुषदानवान् जीवान्। चेतनाचेतनान् मिश्रान् सकलपदार्थान्। तत्र चेतना श्रीर्मुक्ताश्च। अचेतना घटादयः। मिश्राः सात्मका देहाः॥ कथं विचक्रम इत्यत उक्तं। **गोपा** इति। तदुपलक्षणपरमित्याशयेन व्याख्याति। रक्षकत्वेनेति। सर्वाणि इत्यत्र पूर्वत्र सम्बन्ध उक्तः। विभुः विचक्रमे इति पूर्वेणान्वयः। **अदाभ्य** इत्यस्यार्थमाह। स्तम्भनीय इति। स्तम्भनीयो। निवारणीयः॥ यत एवं महामाहात्म्यो विष्णुः। **अतः** कारणात्। **धर्माणि** जगतो धारकानपि वाय्वादीन्। स एव **धारयन्** वर्तते इति शेषः॥

4

(1, 22, 19)

जानीथ विष्णुकर्माणि प्राणिकर्माण्यशेषतः।
यतो जातान्यविज्ञातो भगवान् सर्वदैव हि॥

स्पशा ज्ञातदृशौ यस्तदिन्द्रस्य सहितः सखा ।
प्राणस्यैवेन्द्रनाम्नश्च कस्मिन्न्वहमिति श्रुतेः ।
त्वयेदिन्द्रेतिवचनात् प्राण इन्द्राभिधो मतः ॥

(हे जनाः । **विष्णोः कर्माणि । पश्यथ** जानीथ । कथं भूतानि व्रतानि? अशेषतः प्राणिकर्माणि च । **यतो** येभ्यः कर्मभ्यो जानातीति शेषः । विष्णोर्वा एतद्विशेषणम् । अनुपलम्भबाधितं एतद् इत्यत उक्तं । **पस्पशे** भगवान् सर्वदा एव अविज्ञातश्च शब्दात् ज्ञातश्च । तदुपपादयति स्पशेति । यस्मादेवं धातुव्याख्यानं तस्मादुक्तं युक्तं । अज्ञातदृशौ प्रत्यक्षायोग्यस्य अर्थस्य दर्शने । ततश्च पस्पश इति लिडन्तस्य प्राकृतैः अदृश्य एव योगिभिः दृष्टो बभूव इत्यर्थः ।

इन्द्रस्य इति । **युज्यः** सर्वदा योगार्हः । तस्यार्थः सहित इति । अत्र **पस्पशे** यश्च इन्द्रस्य **युज्यः सखा** तस्य विष्णोः इति एकवाक्यतया योजना । इन्द्रशब्दस्य प्रसिद्धेन्द्रः तावदर्थः । अर्थान्तरं च आह । प्राणस्यैव इति । सखेति सम्बन्धः । एव शब्देन अयमेव मुख्यार्थः इत्याचष्टे । तत्कुत इत्यत आह । कस्मिन्निति । 'कस्मिन्नु अहं उत्क्रान्त उत्क्रान्तो भविष्यामि, कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामि' इति प्राणं असृजत इति श्रुतेः विष्णुप्राणयोरेव नित्ययोगदर्शनात् इत्यर्थः । इन्द्रशब्दस्य प्राणवाचित्वं कुतः? इत्यत आह । त्वयेदिन्द्रेति । 'त्वयेदिन्द्रयुजावयं' इत्यस्यां ऋचि इन्द्रशब्दस्य प्राणे प्रयोगदर्शनात् । 'इयं हि तं देवा अब्रुवन्' इत्यत्र अर्थे संमतित्वेन उपनिषद् उदाहृता ॥)

5

(1, 22, 20)

रमाब्रह्मशिवादिभ्यो यद्विष्णोः परमं पदम् ।
रूपं पश्यन्ति निर्मुक्ताः संसारात्सूरयः सदा ।
चक्षुर्दिवीव व्याप्तं यददृश्यं फलदर्शितम् ॥

(परमत्वस्य प्रतियोगिसापेक्षत्वाद् रमाब्रह्मशिवादिभ्य इत्युक्तम् । पदं इत्यनुवादेन रूपं इति व्याख्यानम् । **सूरय** इत्यस्य अर्थः संसारात् निर्मुक्ताः इति । ते हि मुख्यतः सूरयः । दृष्टान्तस्य तात्पर्यमाह ।

अदृश्यं इति । यथा हि **चक्षुः** आकाशे व्याप्तमपि न दृश्यते, केवलं विषयोपलब्धिलब्धलक्षणेन फलेन अनुमीयते। तथा परमेश्वरस्वरूपं सर्वगतं अपि न दृश्यम् । किंतु अस्वतन्त्राणां पदार्थानां सत्ताप्रतीतिप्रवृत्तिभिः ज्ञायते इति ।।)

6

(1, 22, 21)

सन्दीपयन्ति विज्ञानैः संसारात्प्राप्तजागराः ।
विपन्यवो ज्ञानितमा विष्णोर्यत् परमं पदम् ।
तात्पर्याधिक्यविज्ञप्त्या अर्थमेतं पुनर्जगौ ।।

(सन्दीपयन्ति । इन्धी दीप्तौ । **जानन्ति** ज्ञापयन्ति वा । विज्ञानैः इति शेषः । **जागृवांसः** प्राप्तजागराः । के ते? संसारात् मुक्ता इति शेषः । **विपन्यवः** इत्यस्य व्याख्यानं ज्ञानितमाः इति । पनतिः अत्र ज्ञानार्थः । ततो युः ।।

ननु एतदृगर्थः पूर्वस्यां ऋचि उदितः एव, अतः किमर्थं पुनरुच्यते? इत्यत आह । तात्पर्येति । सर्वेषामपि वेदानां अस्मिन्नर्थे तात्पर्याधिक्यं इति अस्यार्थस्य विज्ञप्त्यै । (एतमर्थं विष्णोः सर्वोत्तमत्वादिकं जगौ वेदः ।।)



IV

EXCERPTS FROM RĀGHAVENDRA-TĪRTHA'S MANTRĀRTHA-MAÑJARĪ

1

(1, 22, 16)

यतः कारणात्। **विष्णुः** विशेषचेष्टाबलवान्। 'णकारो बलं षकारः प्राणः' (ऐतरेय उपनिषदि ३।२।६) इति श्रुतेः। **पृथिव्याः** ल्यब्लोपे पञ्चमी। पृथिवीमारभ्य। **सप्तधामभिः** सप्तलोकैः साकम्। **त्रिभिः** क्रमैः पादविक्षेपैः। इदं वक्ष्यमाणम्॥

2

(1, 22, 17)

इदं जगत्। विचक्रमे आक्रान्तवान्। असुरेभ्यो जहारेति यावत्। हृत्वा च सुरान् स्वपदस्थांश्चक्रे इति शेषः। **अतः** एवं विष्णुप्रसादाल्लब्धपदत्वेन समर्थत्वात्। **देवाः**। **नः** अस्मान्। **अवन्तु** रक्षन्तु॥

विष्णुः भगवान्। **इदं** विश्वम्। **वि चक्रमे** विक्रान्तवान्। कथम्? **त्रेधा पदं नि दधे**। तदा। **अस्य** जगत्पतेः। **पांसुरे** पंसवो रेणवः पांस्वभिमानिदेवा वा रमन्ते अत्र इति पांसुरः पादः। तस्मिन्। रमेः अधिकरणे डः। इदं विश्वम्। समूळ्हं समूढं। पांसुवत् प्रतिष्ठितमिति यावत्॥

3

(1, 22, 18)

अदाभ्यः अस्तम्भनीयः अनिवारणीयः इति यावत्। 'आसुयुवपिरपिलपित्रपिचमश्च' इति तृतीयाध्यायस्याद्यपादीयसूत्रे 'ऋहलोर्ण्यत्' इति ण्यत्प्रकरणगतेऽनक्तसमुच्चयार्थः चकारः। 'दभ दाम्भे' इति वृत्तावुक्तेर्दभेर्धातुष्वपठितस्यापि चुरादौ 'बहुलमेतन्निदर्शनं' इति वचनाच्छिष्टप्रयोगाच्च 'क्षपयति, तुत्थयति, अवधीरयति इत्यादिवद् धातुत्वं वक्तव्य'मिति मञ्जर्यां उक्तेः अतोऽत्र दभेर्ण्यत्प्रत्ययो ध्येयः॥ विष्णुः। **त्रीणि**

पदा सर्वाणि त्रिविधानि पदानि स्वरूपाणि । . . . । **गोपाः** रक्षकः सन् । रक्षकत्वेनेति यावदुपलक्षणम् । भर्तृत्वमोक्षदत्वे च आदिपदार्थौ । इत्यपि च ध्येयम् । **वि चक्रमे** अतिक्रान्तः ।।

4

(1, 22, 19)

The import of the mantra is rather obscure. Sāyaṇa interprets the mantra as describing Vishṇu as identical with the Sun (ayam ādityātmā Vishṇuh), who is responsible for the wheel of time (kāla), with ninety-four details (kālāvayavān, chaturadhikanavati-samkhyākān). With the movement in the form of gyrations of the Sun, these aspects of the time also assume periodical revolutions, like the circular movements of a wheel (chakram na vṛttam). The Sun brings forth a variety (avīvipat) of forms incidental to such periodical revolutions. He is ever active, as a youth full of energy (yuvā), but he is never childish (akumārah) in the sense of being errant or impulsive. He is able to

keep the time revolving without fault, because he is inspired by the pious prayers of the human devotees (ṛkvabhih). He heeds to our invocations and supplications (āhavam pratyeti). His response to our overtures is positive.

(१) चतुर्भिः साकं नवतिं च नामभिः ।।

In the general background of the unintelligibility of this mantra, the play with numbers here is further intriguing. The number 94 (chaturbhis sākam navatih) appears to have found reference here. It may be noted that we find 3,7,9 and 12 are numbers that have a curious significance for the Vedic people. One mantra (1,164,48) speaks of a wheel with 360 spokes (triśatā-shashṭi); another (1,164,0) refers to 720 (sapta-śatāni viṁśatiścha). The numbers, without doubt, have a meaning, although we are not always certain what it is. In the present context, it is obvious that the revolving sun-archetype is the focus of attention. If the sun is identified with Vishṇu, the all-embracing spirit of creation, Vishṇu is identified with time (kālātmako vishṇuh).

And the expression 'nāmabhih' (in the plural) refers to the periodical inclinations of the sun ('svakīyaih namana-prakāraih'), from the meaning of the root 'nam' ("to bend", namyati). The Sun while revolving is seen to make these inclinations. They are likened to the spokes of a wheel. And they are enumerated here as totalling ninety-four (navatim chaturbhis sākam, ninety along with four), which are like multiple spokes of a wheel ('bahvaropetam chakram iva). What this number refers to cannot be easily figured out. Sāyaṇa, however, provides an explanation :

Year (samvatsara)-1; half-years (ayane)-2; seasons (ṛtavah)-5; months (māsāh)-12; half-months (ardha-māsāh)-24; days and nights (aho-rātrāh)-30; watches of three hours (yāmāh)-8; zodiacal periods (lagnāni)-12; Total 94.

One wonders if this explanation is not rather far-fetched and anachronistic. But in the absence of another and better explanation, this may be allowed to stay.

The Vedic ideology does accept the year (samvatsara, meaning that in which all beings dwell together, 'sam vasante asmin bhūtāni') as identical with the creator, and with the Sun. *Śatapatha-brāhmaṇa* (10,2,4,3) says:

संवत्सरो वै प्रजापतिः । . . स यः संवत्सरोऽसौ स आदित्यः ॥

and elsewhere (2,2,3,9)

आदित्यस्त्वेव सर्वा ऋतवः ॥

But in the Vedic ideology, the reckoning of the year appears to have been four-fold, and it is possible that the expression 'chaturbhih sākam' refers to this (cf. *Taittirīya-brāhmaṇa* 1,4,10,1) :

अग्निर्वाव संवत्सरः । आदित्यः परिवत्सरः । चन्द्रमा इदावत्सरः । वायुरनुवत्सरः ॥

Agni is samvatsara; Sūrya is parivatsara; Chandramā is idā-vatsara; and Vāyu is anuvatsara. The reckoning of the year was made on the basis of the three devatās (corresponding to the three realms : Agni on earth, Vāyu in the atmosphere, and Sūrya in the sky) together with Soma (or Chandramā) as the energizing principle. They also correspond with the three steps which Vishṇu planted, and realm beyond them which is transcendental (parama-vyoma) and where Vishṇu abides in his own glory (sve mahimni); unknown to mortals, ineffable and hidden.

(२) चक्रं न वृत्तं व्यतीन् अवीविपत् ॥

The passage of time is cyclical or circular, not rectilinear. Therefore, there can really be no point of beginning or point of ending. The Veda mentions that the creation was in terms of cosmic cycles :

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ॥

The revolving sun provides the archetype of the time that was bound up with creation. Time as an aspect of the cosmic order moves necessarily in a circle : it is both a consequence and an expression of that order. It is to emphasize the cyclical character of cosmic time that the imagery of the wheel (chakra) has been employed. In the well-known 'asya vāmasya' hymn, the Sun is likened to a chariot (ratha), which moves on but a single wheel (1,164,2). Yāska explaining the import of this imagery, traces the word 'ratha' (chariot) to the

root ‘ramhati (meaning “to move speedily”) or alternately to a reversal of the order of letters (varṇa-vyatyaya): ‘sthi-ra’ (what is stable, at rest) becoming ‘ra-tha’ (what moves, does not rest); or again to the fact that one sits comfortably in it and enjoys the ride (*Nirukta*, 9,11) :

रथः रंहतेर्गतिकर्मणः । स्थिरतेर्वा स्याद्विपरीतस्य । रममाणोऽस्मिं-
स्तिष्ठतीति वा । रपतेर्वा रसतेर्वा ॥

And he means by ‘ratha’ the Sun (Durgāchārya : ‘ratham ramhaṇa ādityam’), which does not rest even for a moment (‘ramhaṇaśchāsau muhūrtam apy anavasthāyitvāt’). Seven are the horses that are yoked to it, and horses represent the rays (ādityah raśmibhir yujyate). This chariot has but one wheel (eka-chakra). The word ‘chakra’ for the wheel has been explained by Yāska as derived from the root ‘char’ (meaning “to move”) or from ‘kramu’ (“to plant ones steps”, “to make an onward journey”) (*Nirukta*, 4,27) :

चक्रं चकतेर्वा चरतेर्वा क्रामतेर्वा ॥

The wheel is characterized by circular motion; it is symbolic of cosmic cycles (vṛtta). With twelve spokes (dvadaśāram, which, according to Yāska, refers to the twelve months), the wheel (chakram, the year) revolves repeatedly (varvarti), alround the sky (pari-dyām) (RV. 1,164,10 and 11). The movement of the wheel is described as ‘vṛttam’ (revolving, rolling) from ‘vṛt’, “to turn round”, Dhātu-pāṭha, 18,19 ‘vartate’, vṛta with ‘kta’). In the course

of such revolution, diverse are the things that come to pass, and multiple are the changes that occur. This is suggested by 'vyatīn' (Sāyaṇa; 'vividhātana-svabhāvān'). The variety and multipliciity here refer to the different aspects of time (kāla-avayavān), numbering ninety-four as mentioned above. It is the Sun, the spirit of time, that makes this periodical revolution possible (avīvipat, from the root 'ṭu vepṛ' or 'vip' meaning "to tremble", "to shake", "to stir", 'kampane', *Dhātu-pāṭha* 10,6).

(३) बृहच्छरीरो वि मिमान ऋक्वभिः ॥

The Sun (viz. Vishṇu), as identified with cosmic time, is naturally immense and all-encomapssing. He has a vast 'body' (bṛhat śarīrah yasya sah). All space and all time are included in him, and nothing is left out of him. His form is cosmic (virāṭ). The bodies of all living beings and the forms of all things are really his own bodies and forms. And he organizes cosmic existence in tems of classes, orders, species, sizes, shapes and costitutions (vimimāti). He makes for variety; he structures the universe (vibhajya sthāpayati).

The employment of the word 'ṛkvabhih' (meaning "through the ṛks", from 'ṛchah', "to praise", stutau with 'kvanip'-suffix, 'anyebhyopi dṛśyante', *Pāṇini* 3,2,35) in this context alters the import significantly. Sāyaṇa interprets this word to mean that the Sun makes this multiple creation possible through the hymnal praises ('ṛkvabhih stutimadbhih mantra-vadbhir vā vimimānah'). This does not make sense. Probably, he means that the people offer praises to

him in the form of ṛks, which empower him to proceed with the creation, for it is yajña that sustains cosmic order. This seems out of context. For some light on the matter, we must turn to Yāska's interpretation of 'ṛk' (or ṛchah), while explaining the mantra (1,164,39). The word 'ṛk' has been taken by him in the sense of the body, which is the source, support and sustenance for the sense-organs (which are the devās) established in the body. And there is the spirit (ātmā), which is immortal, within the body (*Nirukta*, 13,14) :

> शरीरमत्र ऋगुच्यते । यदनेन अर्चन्ति प्रत्यृचः सर्वाणीन्द्रियाणि । तस्य यदविनाशिधर्म तदक्षरं भवति । इन्द्रियाण्यत्र देवा उच्यन्ते । यस्मिन्नधि-निषण्णानीत्यात्मप्रवादाः ॥

All the things and beings in the universe are characterized by the possession of individual bodies, in contradistinction with the cosmic body of the Sun (bṛhat-śarīra). The individual bodies are called here 'ṛks'. The Sun, who is the possessor of the cosmic body (bṛhachchharīrah), brings about (vimimāna), the variously constituted world through so many individual bodies (ṛkvabhih). The cosmic body as well as the individual bodies perish, owing to their being subject to the wheel of time, but the spirit within all these bodies (the Sun or Vishṇu) is immortal.

(४) युवाऽकुमारः प्रत्येति आहवम् ॥

Being renewed periodically, in the course of his ever-recurring revolutions (chakra), the Sun is always youthful (yuvā, yautīti, 'yu' or 'uvan',

with 'kanin' suffix, *Uṇādi-sūtra*, 1,156). But he is by no means small, midget or little in shape, size or character (a-kumāra, in the sense of 'analpa'). He is pervasive, all-embracing and virāṭ (bṛhachcharīra).

He is readily responsive to the invocations of the devotees. He approaches them with an inclination favourable to them (pratyeti). The word 'āhava' for invocations also means a sacrifice (from the root 'hu' with āṅg-prefix); but it is more appropriate to the context to take in the sense of prayer, incantation (from the root 'hveñ', meaning "to articulate", "to make sound" śabde). Although cosmic in nature, constitution and spirit, the Sun (viz. Vishṇu) can be oriented to each individual being, for he dwells in each living creature as its essence, spirit and strength.

APPENDIX

ŚAUNAKA'S ṚGVIDHĀNA

Śaunaka's *Ṛgvidhāna* is an important work, providing the 'viniyoga' of the mantras in the *Ṛgveda-samhitā.* It contains an elaborate account of the employment of 'Purusha-sūkta' (sections 29-42 in the third chapter) for practical benefits. This incorporates the worship procedure of Vishṇu ('archanam vishṇoh'), including the nyāsa-vidhi and pūjā-krama of each of the sixteen mantras of the sūkta, the stotra ('jitam te') and the phala-stuti. The Sūkta is here described as facilitating 'ātma-jñāna' 'knowledge of the self' and as the technique of effective meditation (yoga-dhyāna). In fact, practical instructions for contemplation are given here (sections 37-39). The value of devotion (bhakti) is highlighted (section 41).

It may be seen that this work takes up sūkta by sūkta of the entire Ṛgvedic corpus, and prescribes how the mantras may be employed by those who are desirous of material benefits more than spiritual welfare. In providing such 'viniyoga', the author relies on the Smṛti-manuals and also on folklore. Much of the benefits mentioned by the author is, at this point of time, totally irrelevant and smacks of

popular superstition. And it is certainly against the adhyātma and adhidaiva approaches of the Vedic corpus. There is a large involvement of homa and other rituals, which again vitiates against the original spirit of the Ṛgveda. The text appears to have originally comprised of four chapters, to which the fifth which is by far a brief one, was added in the nature of phala-stuti. The entire text is of little value in understanding the Vedic import but it has become an exceedingly important text in the circle of practitioners of the Vedic mantras. That is why the text, not frequently printed till now, has been given as an Appendix.

The entire text is reproduced here, based mainly on the excellent edition of Rudolf Meyer in the Latin *Ṛgvidhānam* (Berolini, MDCCCLXXVII, Dissertio Inauguralis quam consensu et auctoritate Amplissimi Philosophorum ordinis in Alma Litterarum universitate), but with corrected readings.

ऋग्विधानम् ॥

ओं नमो गणेशाय । ओं नम ऋग्वेदाय ॥

अथ प्रथमोऽध्यायः ॥

(१)

(Introduction)

स्वायम्भुवे ब्रह्मणे विश्वगोप्त्रे
नमस्कृत्वा मन्त्रदृग्भ्यस्तथैव ।
मन्त्रेभ्यो मन्त्रदृग्भ्यश्च समाम्नायानुपूर्वशः ।
कर्मणा ऋषिदृष्टानां विधिं प्रोवाच शौनकः ॥२॥

ऋषिभिर्विविधा मन्त्रा दृष्टादृष्टप्रयोजनाः ।
प्रयोजनाय चोद्दिष्टास्तस्मिंस्तस्मिन् प्रदर्शिताः ॥३॥

नानार्थानि च कर्माणि शान्तिपुष्ट्याश्रयाणि च ।
सिद्धयश्च तपोमूलाः श्रद्दधानस्य कुर्वतः ॥४॥

स्तुत्यादयो ये विकाराः प्रदिष्टास्तथार्थवादा ऋक्षु सूक्तेषु चैव ।
यैर्यैः कामै ऋषिभिर्देवताश्च तुष्टूष्यन्ते तान् श्रुणुष्वोच्यमानान् ॥५॥

आयुः स्वर्गो द्रविणं सूनवश्च चतुर्विधं प्रोक्तमाशास्यमग्रे ।
अन्ये कामाः शतशाः संप्रदिष्टाः
संस्तुवद्भि ऋषिभिर्देवताश्च ॥६॥

(२)

(The value of austerity)

सिद्धा मन्त्रा विविधा ब्राह्मणस्य
फलं यच्छन्ति विधिवत्प्रयुक्ताः ।
सत्यं तेषां साधनं संयमश्च
शमस्तितिक्षाऽनसूया दमश्च ॥१॥

तस्माद् द्विजः प्रशान्तात्मा जपहोमपरायणः ।
तपस्यध्ययने युक्तो भवेद्भूतानुकम्पकः ॥२॥

क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः ।
धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः ॥३॥

तपसा स्वर्गमाप्नोति तपसा विन्दते महत् ।
तपोयुक्तस्य सिद्ध्यन्ति कर्माणि नियतात्मनः॥४॥

विद्वेषणं सम्वननं विषघ्नं रोगनाशनम् ।
येन येनार्थं ऋषिणा यदर्थं देवता स्तुताः ॥५॥

स स कामः समृद्धिश्चैषां तेषां तथा तथा ।
तानि कर्माणि वक्ष्यामि विधानानि च कर्मणाम् ॥६॥

(३)

(Purścharaṇa)

पुरश्चरणमादौ तु कर्मणां सिद्धिकारकम् ।
स्वाध्यायाभ्यसनस्यादौ प्राजापत्यं चरेद् द्विजः ॥१॥

केशश्मश्रुलोमनखान् वापयित्वा ऽ प्लुतः शुचिः ।
तिष्ठेदहनि रात्रौ तु शुचिरासीत वाग्यतः ॥२॥

सत्यवादी पवित्राणी जपेद् व्याहृतयस्तथा ।
ओंकाराद्यास्तु ता जप्त्वा सावित्रीं च तदित्यृचम् ॥३॥

आपो हि ष्ठेति सूक्तं तु शुद्धवत्योऽघमर्षणम् ।
शंवत्यः स्वस्तिमत्यश्च पावमान्यस्तथैव च ॥४॥

(४)

(The Japas)

सर्वत्रैतत्प्रयोक्तव्यं आदावन्ते च कर्मणम् ।
आ सहस्रादा शताद्वा दशान्तमथ वा जपेद् ॥१॥

ओंकारं व्याहृतीस्तिस्रः सावित्रीमथ वाऽयुतम् ।
तर्पयित्वाऽद्भिराचार्यान् ऋषींश्च छन्दांसि देवताः ॥२॥

प्रपद्येत विरूपाक्षं रौद्रं मन्त्रगणं जपन् ।
अनार्यैर्न च भाषेत न शूद्रैर्नाऽपि गर्हितैः ॥३॥

न रजस्वल्या नार्या पतितैरन्त्यजैर्नृभिः ।
न देवब्राह्मणद्विष्टैर्नाचार्यगुरूनिन्दकैः ॥४॥

न मातृपितृद्विष्टैर्नावमन्येत कञ्चन ।
मङ्गलाचारयुक्तः स्यात् त्रिरह्नोऽभ्युपयादपः ॥५॥

(५)

(The homa)

अन्तरे द्वादशरात्रस्य स्थालीपाकं प्रकल्पयेत् ।
अग्नये चाथ सोमाय तृतीयं च तयोः सह ॥१॥

वैश्वदेवीं च रौद्रीं च जुहुयादुत्तरे ततः ।
अवसानस्य पतये तथाऽनुमतयेऽपि च ॥२॥

धन्वन्तरय इत्यन्यां गन्धर्वाप्सरसामपि ।
दशमी ब्रह्मणस्पत्या परा तु ब्रह्मणे स्मृता ॥३॥

सरस्वत्यै तथा विष्णोरन्त्या सौविष्टकृत्यपि ।
आज्याहुतय एवादौ स्थालीपाके हुते पुनः ॥४॥

हुत्वाऽग्निं तर्पयेद्विप्रान् पितृभ्यश्च प्रकल्पयेत् ।
ततः शेषं विधानेन शुचिर्भुञ्जीत वाग्यतः ॥५॥

(६)

(Krchhra and Chāndrāyaṇa)

कृच्छ्राणामेष सर्वेषां विधिरुक्तोऽनुपूर्वशः ।
प्राजापत्यातिकृच्छ्रस्य तथा संतपनस्य च ॥१॥

पराकस्य च कृच्छ्रस्य विधिश्चान्द्रायणस्य च ।
एकेन शुद्धिमाप्नोति द्वाभ्यां पापैः प्रमुच्यते ॥२॥

त्रिभिः सिद्ध्यन्ति मन्त्राश्च मुच्यते चोपपातकैः ।
चतुर्भिर्भ्रूणहत्यायास्तथैवायाज्ययाजनात् ॥३॥

पञ्चभिः पातकैः सर्वैर्दुष्कृतैश्च प्रमुच्यते ।
तप्तकृच्छ्रेण सर्वाणि पापानि प्रतिबाधते ॥४॥

चान्द्रायणं सहाद्यन्तमेभिः कृच्छ्रैः समं स्मृतम् ।
त्रिभिश्चान्द्रायणैः पूतो ब्रह्मलोकं समश्नुते ॥५॥

अष्टाभिर्देवता साक्षात्पश्येत वरदास्तथा ।
छन्दांसि दशभिर्ज्ञात्वा सर्वान्कामान् समश्नुते ॥६॥

(७)

(Mahāsantāpana)

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात् प्राजापत्यं चरन् द्विजः ॥१॥

एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत् ।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः ॥२॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकत्रोपवासश्च कृच्छ्रः सांतपनः स्मृतः ॥३॥

(अमावास्यां न भुञ्जीत एष चान्द्रायणो विधिः ।
क्कुटामेकमात्रं तु ग्रासं कुर्यादतन्द्रितः ।)

एतमेव त्र्यहैर्युक्तं महासांतपनं विदुः ।
उपवासस्तु सप्ताहं शिशुसांतपनं समृतम् ॥४॥

(८)

(Yati-Kṛcchra and Pārāka)

तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान् ।
प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः ॥१॥

नियतस्तु पिबेदापः प्राजापत्यविधिः स्मृतः ।
यतिकृच्छ्रं वदन्त्येतद्रपसामपनोदनम् ॥२॥

यतमानोऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पाराको ऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पाराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः ॥३॥

एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्धयेत् ।
उपस्पृशंस्त्रिषवणं एतच्चान्द्रायणं व्रतम् ॥४॥

एतमेव विधिं कृत्स्नमाचरेद्यवमध्यमे ।
शुक्लपक्षादिनि यतश्चरंश्चान्द्रायणव्रतम् ॥५॥

(९)

(Śiśu-chāndrāyana and yati-chāndrāyaṇa)

चतुरः प्रातरश्नीयाद्विप्रः पिण्डान्कृताह्निकः ।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतम् ॥१॥

अष्टावष्टौ समश्नीयात्पिण्डान्माध्यन्दिने स्थिते ।
नियतात्मा हविष्यस्य यतिचान्द्रायणव्रतम् ॥२॥

यथा कथञ्चित् पिण्डानां तिस्रोऽशीतिः समाहितः ।
मासेनाश्नन् हविष्यस्य चन्द्रस्यैति सलोकताम् ॥३॥

एतद्रुद्रस्तथाऽऽदित्या वसवश्चाचरन् व्रतम् ।
सर्वाकुशलमोक्षाय मरुतश्चर्भुभिः सह ॥४॥

यावकः सप्तरात्रेण पातव्यो नियतात्मना ।
स्थानासनत्रिषवणैर्जपता पावनानि च ॥५॥

(१०)

(Purification of body)

एकैकं सप्तरात्रेण पुनाति विधिवत्कृतः ।
त्वगसृक्पिशितास्थीनि मेदो मज्जानमेव च ॥१॥

एकैकं सप्तरात्रं तु त्वगादीनां विशेधनम् ।
एभिर्व्रतैर्विपूतात्मा कुर्यात्कर्माण्यतन्द्रितः ॥२॥

इष्टान्कामांस्ततः सर्वानवाप्नोति न संशयः ।
कणपिण्याकतक्राणामेकैकं शोधनं भवेत् ॥३॥

शुद्धात्मा कर्म कुर्वीत सत्यवादी यतेन्द्रियः ।
एवं शुद्धस्य कर्माणि मन्त्रैर्वक्ष्यामि तद्यथा ॥४॥

त्रिरात्रमेवोपवसेदादितः सर्वकर्मणाम् ।
त्रीणि नक्तानि वा कुर्यात् ततः कर्म समारभेत् ॥५॥

(११)

(Āyushya-Karmas)

नित्यप्रयोगिणां चैव प्रयोगादौ व्रतं त्र्यहम् ।
उपरिष्टादुपवसेत्कृत्वा वा सान्निपातकम् ॥१॥

आयुष्याण्येव कर्माणि मन्त्रयुक्तः समारभेत् ।
शंवत्यः स्वस्तिमत्यश्च जपेत त्रिवृतऋचः ॥२॥

अरण्येऽथोदिते सूर्ये दिशं प्राप्यापराजिताम् ।
प्राचीमथोत्तरां वाऽपि शुचौ देशे समाहितः ॥३॥

सवासाः सशिरस्कोऽप्सु स्नात्वाऽभ्युक्ष्य जपेद् द्विजः ।
शुद्धवत्यस्तथाऽब्वत्यः पावमान्योऽघमर्षणम् ॥४॥

एवं त्रिराप्लुत्य शुचिः प्राणायामान्त्समाचरेत् ।
त्रीन्षळष्टौ द्वादश वा षोळशाष्टादशाऽपि वा ॥५॥

(१२)

(Preparation for Vedic recitation)

आ शताद्वाऽऽयमेत्प्राणान् जपन् ब्रह्माघमर्षणम् ।
यावद्वा मनसस्तुष्टिस्तावत्प्राणान्त्समायमेत् ॥१॥

यथा यथा मनसस्तस्य दुष्कृतं कर्म गर्हति ।
तथा तथा शरीरं तत्तेनाधर्मेण मुच्यते ॥२॥

प्राणायामैर्दग्धदोषः शुक्लाम्बरधरः शुचिः ।
यथाविध्यप आचम्यारोहेद्दर्भप्रस्तरम् ॥३॥

पवित्रपाणिः कृत्वा तूपस्थं दक्षिणोत्तरम् ।
दिशोरवान्तरं प्रेक्ष्यानिमिषं छाद्य चक्षुषी ॥४॥

ओंकारं व्याहृतीस्तिस्रः सावित्रीं च तदित्यृचम् ।
मनसैता अनुद्रुत्य वेदादिं समुपक्रमेत् ॥५॥

(१३)

(Paribhāshā for Vedic recitation)

मन्द्रमेव पठेत्प्रातरुच्चैर्मध्यन्दिने पठेत् ।
उच्चैरेवापराह्णे तु सन्ध्याकाल उपारमेत् ॥१॥

ब्राह्मे मुहूर्त्त उत्थाय त्रिराप्लुत्य पठेद् द्विजः ।
मध्यामां वृत्तिमास्थाय न द्रुतं न विलम्बितम्॥२॥

पूर्वां सन्ध्यां जपंस्तिष्ठेदुपासीत च पश्चिमाम् ।
न चान्तरा व्याहरेत विरमेद्वा कथञ्चन ॥३॥

विरमेद् ब्राह्मणे प्राप्ते कामं तेन तु संवदेत् ।
शूद्रं दृष्ट्वैव संप्राप्तं नाधीयीत कथञ्चन ॥४॥

आग्नेयं सूक्तमाद्यं तु मुख्यं ब्रह्मर्षिसम्मतम् ।
रायस्पोषकरं धन्यं जपन् विप्रोऽर्थमाप्नुयात् ॥५॥
इति परिभाषा ॥

(१४)

(Japya-vidhi)

ऋषिं सर्वमिदं जप्त्वा सपुत्रं नियतः शुचिः ।
संहिताफलमाप्नोति ऋग्वेदस्य न संशायः ॥१॥

एकादशगुणं ह्येतज्जपन्ब्रह्म सनातनम् ।
सर्वान्कामानवाप्नोति पापैश्च परिमुच्यते ॥२॥

अनश्नन्त्संहितामेतं प्रातः प्रातर्दिने दिने ।
आयुर्विद्यां धनं पुत्रान् गृहांश्चाप्नोत्यनामयान् ॥३॥

एतद् ब्रह्म जपन् शूद्रान्नेक्षेतान्यांश्च तद्विधान् ।
प्रेक्ष्याचम्योदकं पूतः पश्येद्रामग्निभास्करौ ॥४॥

मन्द्रं जपो दशगुण उपांशु स्याच्छतान्वितः ।
साहस्रं मानसं विद्यादेष जप्यविधिः स्मृतः ॥५॥

(१५)

(The employment of Sāvitri-gāyatri)

आदावेव तु सावित्र्या कर्म कुर्वीत शान्तये ।
पुष्टये धनलाभाय पशुलाभाय भूतये ॥१॥

एषा हि सम्मिता वेदैः सर्वब्रह्ममयी निचृत् ।
उग्रेण तपसा दृष्टा विश्वामित्रेण धीमता ॥२॥

होमांश्च जपयज्ञांश्च नित्यं कुर्वीत चैतया ।
सर्वकामसमृद्ध्यर्थं परं ब्रह्मेदमुच्यते ॥३॥

एषैव प्रतिलोमोत्कापच्छः शत्रुविनाशनी ।
अक्षर प्रतिलोमेयमभिचारेषु शस्यते ॥४॥

अक्षरप्रतिलोमेयँ यस्मिन्युज्येत कर्मणि ।
तदमोघं विजानीयादेतद्वै ब्रह्मणो बलम् ॥५॥

व्याघातकेध्मसमिधो अक्षरप्रतिलोमया ।
जुहुयात्सार्षपं तैलं बैभीतककृता स्रुचः ॥६॥

य इच्छेत्पीडनं शत्रोरपि वोच्चाटनं पुनः ।
पच्छः सम्पीडयेच्छत्रून् वर्णशश्च प्रमापयेत् ॥७॥

(१६)

(The viniyoga of first sūkta of Ṛgveda)

ऋग्वेदाद्यास्य सूक्तस्य विधिं वक्ष्याम्यतः परम् ।
यथा ऋषिर्मधुच्छन्दः कर्मैस्तेनाकरोत्पुरा ॥१॥

शिरसा धारयेदग्निं नियतः परिवत्सरम् ।
चतुर्थप्राणकालीयो हुतशिष्टमदन्हविः ॥२॥

जुह्वत् त्रिरुपतिष्ठेत सत्यवादी दिने दिने ।
व्रतकाले तु सम्प्राप्त आग्नेयँ निर्वपेच्चरुम् ॥३॥

अनग्नौ ध्यानमात्रोऽग्निर्व्रतान्तेऽस्योपतिष्ठति ।
दहेयमिति यं चेच्छेत् तं दहत्येव पावकः ॥४॥

अप्स्वप्यग्निर्ज्वलत्येव तद् व्रतस्य महात्मनः ।
समर्धयति तं चेष्टैः कामैर्वह्निः प्रयत्नतः ॥४॥

(१७)

(The benefits of japa of three ṛks etc.)

अतःपरं तृचाः सप्त वाय्वाद्या ये प्रकीर्तिताः ।
तान् जपन्प्रयतो नित्यमिष्टान्कामान्त्समश्नुते ॥१॥

मेधातिथावृषौ पुनः सदसस्पतिमित्यृचम् ।
मेधाकामो जपेन्नित्यं जुहुयाच्चाज्यमेतया ॥२॥

स्योनेति पृथिवीं नित्यं स्नात्वा विप्रः शुचिर्जपेत् ।
विन्दते महतीं भूमिमसपत्नामकण्टकाम् ॥३॥

इदं विष्णुरितीमाभिः पञ्चभिः श्राद्धकर्मणि ।
अङ्गुष्ठमन्नेऽवगाह्य तेन रक्षांसि बाधते ॥४॥

अङ्गुष्ठमात्रो भगवान्विष्णुः पर्यटते महीम् ।
राक्षसानां वधार्थाय तच्छ्राद्धे प्रहरिष्यति ॥५॥

अक्षय्यं च भवेदन्नं श्रद्धाभक्तिसमन्वितम् ।
तस्माच्छ्राद्धेषु सर्वेषु अङ्गुष्ठग्रहणं स्मृतम् ॥६॥

सप्तजन्मकृतं पापं कृत्वा चाभक्ष्यभक्षणम् ।
तद्विष्णोरित्यपां मध्ये सकृज्जप्त्वा विशुध्द्यति ।७।।

अम्बयो यन्त्रियाः प्रोक्ता नवर्चस्त्वभिषेचनीः ।
आयुष्यास्ताः परिप्रोक्ता भैषज्याः पापमोचनीः ।।८।।

शुनःशेपं ऋषिं बद्धः संनिरुद्धोऽथवा जपेत् ।
मुच्यते सर्वपाशेभ्यो गदी चाप्यगदी भवेत् ।।९।।

य इच्छेच्छाश्वतान्कामानिन्द्रात्प्राप्तुं पुरंदरात् ।
स षोडशभिरेवग्भिरिन्द्रं स्तूयाद्दिने दिने ।।१०।।

(१८)

(Hairaṇyastūpa sūkta : benefits)

हैरण्यस्तूपमिन्द्रस्य सूक्तं कर्माभिसंस्तवम् ।
तज्जपन्प्रयतः शत्रूनयत्नात्प्रतिबाधते ।।१।।

आकृष्णेनेत्यृचा त्वनेन यो नित्यं सूर्यमर्चति ।
प्रातर्मध्येऽस्तगं वाऽपि स जीवेदगदः सुखी ।।२।।

आ कृष्णेनेत्यृचं त्वेकां ध्यायन्निशि दिवैकसः ।
अग्नौ हुत्वैतया चाज्यं दीर्घमायुरवाप्नुयात् ।।३।।

ये ते पन्था इतीमां नु सावित्रीमध्वगोऽभ्यसेत् ।
स्वस्तिमान्व्रजतेऽध्वानं गृहांश्चाप्नोत्यनामयान् ॥४॥

सं पूषान्निति यत्सूक्तं घौरः कण्वो जगावृषिः ।
अध्वन्यमेतद्विज्ञेयं परिपन्थ्यपसेधनम् ॥५॥

रौद्राभिः षड्भिरीशानं तुष्टुयाद्यो दिने दिने ।
स नारीनरगोशान्तिं शङ्करात्प्राप्नुयात्सदा ॥६॥

एतेनैव षळर्चेन जुहुयादाज्यमन्वहम् ।
चरूं वा कल्पयेद्रैद्रं भूतिकामोऽथ पर्वसु ॥७॥

(१९)

(Saura-sūkta)

उदित्युद्यन्तमादित्यमुपतिष्ठेद्दिने दिने ।
हृद्रोगनाशनं ह्येतत्परमारोग्यवर्धनम् ॥१॥

द्विष्टन्तमित्यथार्धर्चं यं द्विष्यात्तं जपन्त्स्मरेत् ।
आगस्कृत्सप्तरात्रेण विद्वेषमधिगच्छति ॥२॥

रोगैर्गृहीतो रोगी च प्रस्कण्वस्योत्तमं तृचम् ।
आरोग्यमेतत्प्रयतो जपेन्नित्यमनेकशः ॥३॥

उत्तमस्तस्य चार्धर्चो द्विषद्द्वेष इति स्मृतः ।
यं द्विष्यात्तमभिध्यायेद् दृष्ट्वा चैनं जपेदिदम् ॥४॥

अगस्कृच्चेत् त्रिरात्रेण विद्वेषं स निगच्छति ।
उदयत्यायुरक्षय्यं तेजो मध्यन्दिने जपन् ॥५॥

अस्तं व्रजति सूर्ये तु द्विषन्तं प्रतिबाधते ।
ओजस्तेजस्तथाऽरोग्यं द्विषद्द्वेषं प्रकीर्तितम् ॥६॥

(२०)

(Parāśara's sūkta etc.)

नव पश्वेति सूक्तानि यानि जगौ पराशरः ।
अरातीनां हरेत् प्राणांशच्छत्रूंश्चैव नियच्छति ॥१॥

सौपर्णानि पवित्राणि सूक्तान्येकादशाभ्यसेत् ।
वांछन् पुत्रान् पशून् वित्तं स्वर्गमायुरनन्धताम् ॥२॥

आध्यात्मिकीः क इत्येता जपंस्तु सुसमाहितः ।
प्राप्नुयात्स परं धाम विश्वं ज्योतिः सनातनम् ॥३॥

आ नो भद्रीयमायुष्यं वैश्वदेवं जपन्मुनिः ।
मुमूर्षुरपि जप्त्वैतत्सर्वमायुरवाप्नुयात् ॥४॥

(२१)

(The tṛcha in śrāddha ritual)

पितॄणां श्राद्धकाले तु मध्वित्येतत् तृचं पठेत् ।
अघोराः पितरस्तस्य विशन्ति ज्योतिरुत्तमम् ॥२॥

त्वं सामेति तु सूक्तेन पश्येच्चन्द्रमुषोदितम् ।
उपतिष्ठेत्समित्पाणिर्मासि मासि नवं नवम् ॥२॥

तं मासं तस्य दुःखं हि न जातु त्रिविधं भवेत् ।
गोतमेन पुरा दृष्टं मृत्योर्नाशनमात्मनः ॥३॥

उद्यन्तमुपतिष्ठेत पूर्णे चैतत्समाहितः ।
वासांस्यपि स विन्देत चन्द्रस्यैति सलोकताम् ॥४॥

धनकामो जपेन्नित्यमेता इति तु नित्यशः ।
स्नात्वा शुचिस्तु नियत इष्टं धनमवाप्नुयात् ॥५॥

(२२)

(Kautsa-sūkta)

आयुरीप्सन्निममिति कौत्सं सूक्तं सदाऽभ्यसेत् ।
आज्याहुतिश्च जुहुयात्प्रत्यृचं वाग्यतः शुचिः ॥१॥

जपेदाप्लुत्य नियतः स साक्षादापदं तरेत् ।
अप नः शोशुचदिति स्नात्वा मध्यंदिने रवौ ॥२॥

शुद्धिकामो यताहारः प्रत्यृचं जुहुयाद् घृतम् ।
समिधोऽन्वहमष्टौ वा सूक्तमेतदघापहम् ॥३॥

यथा मुञ्जादिवेषीका तथा पापात्प्रमुच्यते ।
जातवेदस इत्यादि सदा स्वस्त्ययने जपेत् ॥४॥

दुर्गो पथि प्रयातस्य नास्यारिभ्यो भयं भवेत् ।
राजकार्ये श्वयूथे वा अभिशस्तोऽप्यनेकधा ॥५॥

अशक्ये प्रतिभाकार्ये भये प्राणान्तिकेऽपि वा
जातवेदस इन्येतं जपंस्तेभ्यः प्रमुच्यते ॥६॥

सिसाधयिषुरर्थं च प्रस्थितो मनसा जपेत् ।
सिद्धार्थः स्वस्तिमाप्नोति प्रमीयेत न चाध्वनि ॥७॥

(२६)

(Svastyayana)

कृतार्थः स्वगृहान् गच्छन्नेतमेव सदाऽभ्यसेत् ।
उदिते सवितर्येतं जपेदस्तं गते तथा ॥१॥

अहः स्वस्त्ययनं प्राता रात्रिस्वस्त्ययनं निशि ।
व्युष्टायां च जपेन्नित्यमेतां दुःस्वप्ननाशनीम् ॥२॥

प्र मन्दिन इत्यसूत्यां जपेद्गर्भप्रमोचनीम् ।
इन्द्रं च मनसा ध्यायेन्नारी गर्भं प्रमुञ्चति ॥३॥

आपत्सु सर्वकामो वा त्रितं नित्यं जपेदृषिम् ।
जपन्निन्द्रमिति स्नातो वैश्वदेवं तु सप्तकम् ॥४॥

मुच्यते जुह्वदाज्यं तु विश्वस्मादेव सोऽहसः ।
शंतातीयं परं सूक्तं पञ्चविंशकमुत्तमम् ॥५॥

नासत्यौ तु नमस्कृत्य परां ऋद्धिमवाप्नुयात् ।
घर्मसंस्तवनं सूक्तं रपसश्च प्रमोचनम् ॥६॥

इमा इति जपेच्छश्वद्रौद्रं सूक्तं द्विजः शुचिः ॥
आयुर्विद्यां धनं पुत्रान् गृहांश्चाप्नोत्यनामयान् ॥७॥

(२४)

(The employment and benefits of 'mā no')

वीरेष्वपत्यगोष्ठेषु दुःस्वप्नेऽरिप्रमात्मनः ।
मा नो महान्तमित्याभ्यां त्रिरात्रोपोषितः शुचिः ॥१॥

औदुम्बरीस्तु जुहुयाद्दधिमध्वाज्यसंस्कृताः ।
सूक्तेन जुहुयादाज्यमादावन्ते च कर्मणाम् ॥२॥

ऊर्ध्वबाहुस्तु सूक्तेन तुष्टाव शतशो भवम् ।
छित्त्वा सर्वान्मृत्युपाशान् जीवेद्रोगैर्विवर्जितः ॥३॥

तिष्ठन्नुद्यन्तमादित्यं समित्पाणिः शुचिः सदा ।
चित्रमित्युपतिष्ठेत सूक्तेनानेन भास्करम् ॥४॥

अतिस्तवेन चैतेन नित्यं मध्यंदिने रवौ ।
गृणन्नपोहते रिप्रं प्राप्नोति च धनायुषी ॥५॥

(२५)

(The value of mantras addressed to Vishṇu and Indrā-vishṇu)

अथ स्वप्नस्येति जपेत्प्रातः प्रातर्दिने दिने ।
दुःस्वप्नं नुदते क्षिप्रं न चास्याभोजनाद्भयम् ॥१॥

उभे पुनामीति पुरा रिपुघ्न्यस्तु प्रकीर्तिताः ।
ता जपन् हन्ति रक्षांसि सपत्नांश्च नियच्छति ॥२॥

निर्वर्त्य पञ्चयज्ञांश्च हुत्वा चाग्निं कृताह्निकः ।
मे देवासो दिव्यनया जपन् कामानवाप्नुयात् ॥३॥

इन्द्राविष्णू नमस्कृत्य विष्णोर्नु कमिति त्रिभिः ।
समित्पाणिः शुचिर्भूत्वा उपतिष्ठेद्दिने दिने ॥४॥

धर्मं बुद्धिं धनं पुत्रानारोग्यं ब्रह्मवर्धनम् ।
प्राप्नोति च परं स्थानं ज्योतीरूपं सनातनम् ॥५॥

आततायिनमायान्तं दृष्ट्वा व्याघ्रमथो वृकम् ।
न मा गरन्निति जपंस्तेभ्य एव प्रमुच्यते ॥६॥

त्रिरात्रोपोषितो रात्रौ जपेदा सूर्यदर्शनात् ।
आप्लुत्य प्रयतः सौरीरुपतिष्ठेद्दिवाकरम् ॥७॥

(२६)

नैनं पश्यन्ति वै चौरास्तथाऽन्ये पापवृत्तयः ।
एकः शतानि त्रायेत तस्करेभ्यश्चरन् पथि ॥१॥

स्तेयं कृत्वा द्विजो मोहात् त्रिरात्रोपोषितः शुचिः ।
सूक्तं जप्वाऽस्यवामीयं क्षिप्रं मुच्येत किल्बिषात् ॥२॥

ज्ञातिपुत्रसुहृन्मित्रैर्यश्च राज्यं चिकीर्षति ।
नित्यं स नियतो भूत्वा सूक्तं तु मनसा जपेत् ॥३॥

कया शुभेति पैशुन्यं कृत्वाऽऽचार्यनृपद्विजैः ।
श्रुत्वा पररहस्यं तु गुरोरप्याह शौनकः ॥४॥

इमं नु सोममित्येते द्वे ऋचौ प्रयतो जपेत् ।
सर्वान्कामानवाप्नोति न किञ्चित्पातकं भवेत् ।।५।।

पितुं न्विन्युपतिष्ठेत नित्यमन्नमुपस्थितम् ।
पूजयेदशनं नित्यं भुञ्जीयादविकुत्सयन् ।।६।।

(२७)

(The elimination of poison and diseases)

नास्य स्यादन्नजो व्याधिर्विषम्यन्नामियात् ।
विषं च पीत्वैतत्सूक्तं जपेत विषनाशनम् ।।१।।

नावाग्यतस्तु भुञ्जीत नाशुचिर्न जुगुप्सितम् ।
दद्याच्च पूजयेच्चैव जुहुयाच्च शुचिः सदा ।।२।।

क्षुद्भयं नास्य किञ्चित्स्यान्नान्नजं व्याधिमाप्नुयात् ।
उत्पथप्रतिपन्नो यो भ्रष्टो वाऽपि पथः क्वचित् ।।३।।

पन्थानं प्रतिपद्येत कृत्वा वा कर्म गर्हितम् ।
अग्ने नयेति सूक्तेन प्रत्यर्चं जुहुयाद् घृतम् ।।४।।

जपंश्च प्रयतो नित्यमुपतिष्ठेत चानलम् ।
स्नात्वा जपेदनर्वाणं नमस्कृत्य बृहस्पतिम् ।।५।।

(२८)

वीरान् धनं च प्राप्नोति सुश्लोक्यं च नियच्छति ।
कङ्कतो नेति सूक्तं तु विषार्तः प्रयतो जपेत् ॥१॥

विषं न क्रमते चास्य सर्पाद् दृष्टिविषादपि ।
यत्कीटलूटासु विषं दंष्ट्रिवृश्चिकजं च यत् ॥२॥

मौलं च कृत्रिमं चैव जपन्त्सर्वं व्यपोहति ।
धर्मं बुद्धिं धनं पुत्रान्सौभाग्यं ब्रह्मवर्चसम् ॥३॥

आरोग्यं पुष्टिमायुष्यं पशून्विद्यां महद्यशः ।
त्रिरात्रोपोषितः स्नातः प्रयतश्चरितव्रतः ॥४॥

प्राणायामशतं कृत्वा उपतिष्ठेच्छतक्रतुम् ॥
एकाहं क्षुरसंयुक्तः पादौ सन्धाय वाग्यतः ॥५॥

(२९)

यो जात इति सूक्तेन ऋषिं गृत्समदं स्मरन् ।
शतकृत्वो जपेदेतदिन्द्रश्रेष्ठेति चान्ततः ॥१॥

एकाहाल्लभते वित्तं द्व्यहात्सिद्धिमनुत्तमाम् ।
अहोभिस्त्रिभिरारोग्यं चतुर्भिरशनं बहु ॥२॥

पञ्चभिर्ब्रह्मवर्चस्यं षड्भिरायुः सुखावहम् ।
सप्तभिस्तनयं पुष्टिमष्टभिः प्राप्नुयाद्यशः ।।३।।

प्रियो भवति चेन्द्रस्य प्रियं धाम स गच्छति ।
रिपुघ्नं दस्युशमनं रायस्पोषकरं परम् ।।४।।

गणानामिति यत्सूक्तं तज्जपेत्सुखवर्धनम् ।
संध्ययोः प्रयतस्त्वेतज्जपेन्नित्यं बृहस्पतिम् ।।५।।

(३०)

उपतिष्ठेत सूक्तेन सर्वकामसमृद्धये ।
यो मे राजन्नितीमां तु दुःस्वप्नशमनं ऋचम् ।।१।।

जप्त्वा नाशयति क्षिप्रं दुःस्वप्नं ब्राह्मणः शुचिः ।।
अहोरात्रमुपोष्यैकं नियतो ब्रह्मवित्तमः ।।२।।

प्रजार्थं जुहुयादाज्यं चरूं वा पयसि श्रितम् ।
राकामहमितीमाभिः षष्ठ्यां शुक्लस्य पञ्चभिः ।।३।।

हविःशेषं स्वयं प्राश्य विन्दते महतीं प्रजाम् ।
व्याधीना योऽभिभूतः स्याद् घोरेण प्राणहारिणा ।।४।।

चतुर्दशीमुपोष्यैकं कृष्णस्य जुहुयाच्चरुम् ।
आ ते सूक्तेन रौद्रेण प्रत्यर्चं वाग्यतः शुचिः ।।५।।

(३१)

पूर्वमाज्याहुतीर्हुत्वा अथोपस्थाय शङ्करम् ।
हविःशेषेण वर्त्तेत एकान्तरमतन्द्रितः ॥१॥

पूर्णे मासि जयन्मृत्युं रोगेभ्यश्च प्रमुच्यते ।
अभिशस्येत यो मोहात्कुर्याद्वा कर्म गर्हितम् ॥२॥

स्नात्वाऽभुञ्जन् जपेदप्सु अम्बीत्यृचमतन्द्रितः ।
अध्वनि प्रस्थितो यस्तु पश्येच्छकुनमुत्थितम् ॥३॥

अप्रशस्तं प्रशस्तं वा स्थित्वैक्ष्य प्रयतो जपेत् ।
कनिक्रददिति सूक्ताभ्यामुपतिष्ठेत्ततः स्वरम् ॥४॥

शकुनिं वायसं वाऽपि मृगं दंष्ट्रिणमेव च ।
अप्यदृष्ट्वैव जप्तव्यमेतत्तस्करमोहनम् ॥५॥

॥इत्यृग्विधाने प्रथमोऽध्यायः समाप्तः ॥

।।अथ द्वितीयोऽध्याय: ।।

।। ओं ।।

(१)

(Viśvāmitra-nadī-samvāda)

कल्याणवादी वाऽन्यो वा न वा रौति न दृश्यते ।
जपेदेव नमस्कृत्य सिद्धार्थः संनिवर्त्तते ।।१।।

न तस्यास्ति भयं किञ्चिद्दस्युभ्योऽध्वनि वा क्वचित् ।
तरत्यपि च दुर्गाणि स्वस्तिमांश्च सुखी भवेत् ।।२।।

यस्य भुक्तं न जीर्येत न तिष्ठेद्वा कथञ्चन ।
ध्यात्वा सोत्तरमन्नस्याग्निरस्मीत्यृचं जपेत् ।।३।।

विश्वामित्रस्य संवादं नद्यतिक्रमणे जपेत् ।
आप्लुत्याचम्य विधिवदुदकस्याञ्जलिं क्षिपेत् ।।४।।

नमः स्रवद्भ्य इत्येतद्यो नित्यं हि समाचरेत् ।
तं नद्यः स्रोतसः पान्ति स्वं पुत्रमिव मातरः ।।५।।

(२)

भयं चास्य न विद्येत नदीतीरचारेष्वपि ।
जलचरेभ्यो भूतेभ्यः शीतोष्णैर्न च बाध्यते ॥१॥

पूर्णां तितीर्षुः सरितं रमध्वमिति संस्मरेत् ।
ओ ष्वित्यृचमपां मध्ये जपेद्यो वै नदीं तरन् ॥२॥

स शीघ्रं तीरमाप्नोति गाधं वा विन्दते द्विजः ।
युक्तेनैव रथेनाशु योऽपां पारं तितीर्षति ॥३॥

उद्व ऊर्मिरितीमां तु जपेत नियतः स्वयम् ।
अध्वानं प्रस्थितश्चैवं आ मन्द्रैरिति संस्मरेत् ॥४॥

कार्याण्यशेषतः कृत्वा पुनरायाति वै गृहम् ।
इन्द्रा पर्वतेति सूक्तमायुष्यं द्रविणं स्मृतम् ॥५॥

अदातारं सुपुष्टार्थं सर्वदाविष्टचेतनम् ।
हत्वा तद्धनमन्विच्छेत्किं ते कृण्वन्तीति स्मरन् ॥६॥

(३)

वागिन्द्रियप्रमूढो यो न विद्यां प्रतिपद्यते ।
इन्द्रियार्थान्यथार्थान्वा यो न वेत्ति कथञ्चन ॥१॥

विद्या वाऽधिगता यस्य प्रणश्येत पुनः पुनः ।
ससर्पीऋचौ जपन् द्वौ मासौ प्रतिपद्यते ॥२॥

अनसा सम्प्रयातस्तु स्थिरौ गावाविति स्मरेत् ।
चतस्त्रः कुशलेनैति सिद्धार्थः स्थिरयानगुः ॥३॥

यानाक्षमपभग्नान्तं दृष्ट्वा दुर्गेऽध्वनि द्विजः ।
अभि व्ययस्वेति जपेद् द्वृचमक्षबलं दधत् ॥४॥

कृष्णपक्षे चतुर्दश्यां त्रिरात्रोपोषितः शुचिः ।
दक्षिणप्रवणे देशे श्मशानस्थः समाहितः ॥५॥

(४)

सक्तोष्णीष्यसिपाणिश्च बैल्वकेध्मोऽनिलाशनः ।
सप्ताहं जुहुयात्तैलं सार्षपं लवणान्वितम् ॥१॥

समिधो राजवृक्षस्य वसिष्ठद्वेषिणीः पठन् ।
यं द्विष्यात्तस्य कृत्वा तु शम्याकेनाकृतिं निशि ॥२॥

अधिष्ठाय च तां कुर्यादग्भिश्चतसृभिर्द्विजः ।
उद्दिश्य नाम होमोऽयं सप्तरात्रं न जीवति ॥३॥

वासिष्ठानन्ततो हन्ति ब्रह्मैतन्कुशिकोदितम् ।
नास्ति कश्चिदवध्योऽस्ति जपतो जुह्वतोऽपि वा ॥४॥

द्वाविंशकं जपेत्सूक्तमाध्यात्मिकमनुत्तमम् ।
पर्वसु प्रयतो नित्यमिष्टान् कामान्त्समश्नुते ॥५॥

(५)

(Bṛhaspati-sūkta)

बृहस्पतिमजाश्वं च सवितारं च बभ्रुं च ।
ऋतावृधौ दिने दिने तृचैः पञ्चभिरन्वहम् ॥१॥

बृहस्पत इति पञ्चाहं प्रत्यृचं जुहुयाद् घृतम् ।
हुत्वाऽग्निमर्चयित्वा तु गन्धमाल्यैः सधूपकैः ॥२॥

ता एव देवताः पञ्च कामैरर्चन्ति पञ्चभिः ।
रत्नैरपत्यैः पशुभिर्मखैर्दीर्घेण चायुषा ॥३॥

(६)

(Gāyatri-sāvitri mantra)

अथ वेदादिगीतायाः प्रसाददजननं विधिम् ।
गायत्र्याः सम्प्रवक्ष्यामि धर्मकामार्थमोक्षदम् ॥१॥

नित्ये नैमित्तिके काम्ये त्रितये तु परायणम् ।
गायत्र्यास्तु परं नास्ति इह लोके परत्र च ॥२॥

मेध्यान्नमितभुङ् मौनी त्रिः स्नानार्चनतत्परः ।
जपेल्लक्षत्रयं धीमाननन्यमानसक्रियः ॥३॥

कर्मभिर्योजयेत्पश्चात् क्रमशः स्वेच्छयाऽपि वा ।
यावत्कार्यं न कुर्वीत न लोपेत्तावत्तद्व्रतम् ॥४॥

आदित्यस्योदये स्नात्वा सहस्रं प्रत्यहं जपेत् ।
आयुरारोग्यमैश्वर्यं धनं च लभते ध्रुवम् ॥५॥

(७)

त्रिरात्रोपोषितः सम्यग् घृतं हुत्वा सहस्रशः ।
सहस्रलाभमाप्नोति हुताशे खदिरेन्धने ॥१॥

पलाशसमिधां चैव घृताक्तानां हुताशने ।
सहस्रलाभमाप्नोति राहुसूर्यसमागमे ॥२॥

हुत्वा तु खदिरे वह्नौ सघृतं रक्तचन्दनम् ।
सहस्रहेममाप्नोति राहुचन्द्रसमागमे ॥३॥

रक्तचन्दनमिश्रं तु सघृतं हव्यवाहने ।
हुत्वा गोमयमाप्नोति सहस्रं गोधनं द्विजः ॥४॥

यस्यास्तु गोर्गोमयेन गुटिकानां सहस्रशः ।
हुत्वा तां गामाप्नोति घृताक्तानां हुताशने ॥५॥

(८)

यवैरश्वांस्तिलैर्हस्तीन् महिष्यो यावकैस्तथा ।
शलिताण्डूलहोमेन कन्यालाभमवाप्नुयात् ॥१॥

जातिचम्पकराजार्ककुसुमानां सहस्रशः ।
हुत्वा वस्त्राण्यवाप्नोति घृताक्तानां हुताशने ॥२॥

सूर्यबिम्बे जलमध्ये तोयं हुत्वा सहस्रशः ।
सहस्रं प्राप्नुयाद्धैमं रौप्यमिन्दुमये हुते ॥३॥

अलक्ष्मीपापसंयुक्तो मलव्याधिविनायकैः ।
मुच्येत्सहस्रजप्तेन स्नायाद्यस्तु जलेन वै ॥४॥

यां दिशं सप्तजप्तेन लोष्टेन सम्प्रचाटयेत् ।
चौराग्निमारुतोत्थानि भयानि न भवन्ति वै ॥५॥

(९)

क्षीराहारो जपेल्लक्षमपमृत्युं व्यपोहति ।
घृताची प्राप्नुयान्मेधां बहुविज्ञानसञ्चयम् ॥१॥

हुत्वा वेतसपत्राणि घृताक्तानां हुताशने ।
लक्षाद्वर्धपयेद्देवं सार्वभौमं न संशयः ॥२॥

लक्षेण भस्महोमस्य कृत्वा ह्युत्तिष्ठते जलात् ।
आदित्याभिमुखःस्थित्वा नाभिमात्रे जले शुचिः ॥३॥

तिलानां लक्षहोमेन घृताक्तानां हुताशने ।
सर्वकामसमृद्धात्मा परां स्थानमवाप्नुयात् ॥४॥

यवाणां लक्षहोमेन घृताक्तानां हुताशने ।
सर्वकामसमृद्धात्मा परां सिद्धिमवाप्नुयात् ॥५॥

(१०)

घृतस्याहुतिलक्षेण सर्वान्कामानवाप्नुयात् ।
पञ्चगव्याशनो लक्षं जपेज्जातिस्मरो भवेत् ॥१॥

तदेव ह्यनले हुत्वा प्रानोति बहुशो धनम् ।
अन्नाद्यहवनान्नित्यं अन्नाद्यं च भवेत्सदा ॥२॥

जुहुयात्सर्वसाध्यानां आहुत्ययुतसंख्यया ।
रक्तसिद्धार्थकान्हुत्वा सर्वान्साधयते रिपून् ॥३॥

लवणं मधुसंयुक्तं हुत्वा सर्वं वची भवेत् ।
हुत्वा तु करवीराणि सक्तानि जनयेज्ज्वरम् ॥४॥

हुत्वा बैभीतकं तैलं देशादेव प्रचाटयेत् ।
हुत्वा तु निम्बपत्राणि विद्वेषं जनयेन्नृणाम् ॥५॥

सक्तानां तण्डुलानां तु घृताक्तानां हुताशने ।
हुत्वा बलमवाप्नोति शत्रुभिर्न स जीयते ॥६॥

(११)

प्रत्यानयनसिद्ध्यर्थ मधुसर्पिः समन्वितम् ।
गव्यं क्षीरं प्रदीप्तेऽग्नौ जुह्वतस्तत्प्रशाम्यति ॥१॥

ब्रह्मचारी मिताहारो यः सहस्रद्वयं जपेत् ।
संवत्सरेण लभते धनैश्वर्यं न संशयः ॥२॥

शमीबिल्वपलाशानामर्कस्य तु विशेषतः ।
पुष्पाणां समिधां चैव हुत्वा हैममवाप्नुयात् ॥३॥

अब्ब्रह्मत्र्यम्बकादीनां यस्यायतनमाश्रितः ।
जपेल्लक्षं निराहारः स तस्य वरदो भवेत् ॥४॥

बिल्वाणां लक्षहोमेन घृताक्तानां हुताशने ।
परां श्रियमवाप्नोति यदि न भ्रूणहा भवेत् ॥५॥

(१२)

पद्मानां लक्षहोमेन घृताक्तानां हुताशने ।
प्राप्नोति राज्यं निखिलमसपत्नमकण्टकम् ॥१॥

पञ्चविशंतिलक्षेण दधिक्षीरघृताशनः ।
स्वदेहे सिद्ध्यते जन्तुः कौशिकस्य मतं यथा ॥२॥

एकाहं पञ्चगव्याशी एकाहं मारुताशनः ।
एकाहं ब्राह्मणान्नाशी गायत्रीजप उच्यते ॥३॥

शतेन गायत्र्या स्नात्वा शतमन्तर्जले जपेत् ।
शतेनापस्ततःपीत्वा सर्वपापैः प्रमुच्यते ॥४॥

गोघ्नः पितृघ्नो मातृघ्नो ब्रह्महा गुरुतल्पगः ।
सुवर्णरत्नहारी च यश्च विप्रः सुरां पिबेत् ॥५॥

अयाज्ययाजनं कृत्वा कृत्वा वा कर्म गर्हितम् ।
न सीदेत्प्रतिगृह्णानो महीमपि ससागरम् ॥६॥

ये चास्य दूषिता लोके गृहाः सूर्यादयो भुवि ।
ते यान्ति सैम्यतां सर्वे शिवा इति न संशयः ॥७॥

(१३)

कृणुष्वेति जपन्त्सूक्तं रक्षोघनं दस्युभिर्वृतः ।
अरातीनां हरेत्प्राणान् रक्षांस्यपि च नाशयेत् ॥१॥

उपतिष्ठेत यो वह्निं परीत्यृचा दिने दिने ।
तं रक्षति स्वयं वह्निर्विश्वतो विश्वतोमुखः ॥२॥

को अद्येति तु सूक्तेन यो नित्यं शक्रमर्चति ।
जपेद्वाऽथ नमस्कारैः शक्रतो लभते वरान् ॥३॥

कयेति वामदेव्येन कुर्यात्स्वस्त्ययनं निशि ।
जपेद्वा सन्धिवेलासु ब्रह्मैतत्कुशिकोदितम् ॥४॥

हंसः शुचिसदित्यृचा शुचिरीक्षेद्दिवाकरम् ।
अन्तकाले जपन्नेति ब्रह्मणः सद्म शाश्वतम् ॥५॥

कृषिं प्रपद्यमानस्तु स्थालीपाकं यथाविधि ।
जुहुयात्क्षेत्रमध्ये तु शुनं वाहास्तु पञ्चभिः ॥६॥

यथालिङ्गं तु विहरेल्लाङ्गलं च कृषीवलः ।
इन्द्राय च मरुद्भ्यश्च पर्जन्याय भगाय च ॥७॥

(१४)

पूष्णे धान्याय सीतायै शुनासीरमथोत्तरम् ।
हुत्वा तु पृथगोतासां यजेदेताश्च देवताः ॥१॥

गन्धमाल्योपहारैश्च फललाजसुरासवैः ।
प्रवपणे प्रलवने खलसीतोपहारयोः ॥२॥

एता एव यजेन्नित्यं देवता विधिना शुचिः ।
अमोघं कर्म भवति कृषिर्वर्धति सर्वदा ॥३॥

क्षेत्रस्य पतिनेत्येतत्क्षैत्रपत्यं तृचं जपेत् ।
ईक्षेत्सूर्यं द्विजो नित्यं विन्दते क्षेत्रमुत्तमम् ॥४॥

आखूत्करेषु चरुणा यजेदनेन मूषिकान् ।
चित्र इद्राजेत्यनया स्तुत्वा चाखुपतिं सदा ॥५॥

(१५)

ब्राह्मणान्भोजयेदत्र कीनाशांश्चैव भोजयेत् ।
अप्रमत्तः शान्तिपरः स्वयमेव कृषिं व्रजेत् ॥१॥

भूमिभङ्गो गवां हिंसा तृणकीटादिनाशनम् ।
एतेषु यत्कृतं पापं खलदानेन शुद्ध्यति ॥२॥

धान्यानां विंशकं भागं श्रोत्रियेभ्यो निवेदयेत्।
विंशकस्य हि दानेन कृषिदोषात्प्रमुच्यते ॥३॥

समुद्रादिति सूक्तेन यः सदा जुहुयाद् घृतम् ।
तमग्निः सर्वतः पाति भद्रेण द्रविणेन च ॥४॥

पूर्वोक्तेनैव कल्पेन संयतात्मा जितेन्द्रियः ।
वि ज्योतिषेति ज्वलयेद्यत्रेच्छेज्जातवेदसि ॥५॥

विश्वानि न इति द्वाभ्यां ऋग्भ्यां यो वह्निमर्चयेत्।
स तरत्यापदः सर्वा यशः प्राप्नोति चाक्षयम् ॥६॥

हुत्वा वह्निरूपस्थेयः प्राणार्थं हव्यवाहनः ।
अग्ने त्वमिति सूक्तेन धनमायुश्च वाञ्छता ॥७॥

(१६)

य इच्छेद्द्विविधं वृत्तं सत्त्वं चानुपमं महत् ।
उरो ष्ठ इति सूक्तेनोपतिष्ठेच्छतक्रतुम् ॥१॥

प्रजाकामो यजेन्नित्यं चरूणा देवपत्न्यः ।
उपहृत्योपहारं च शेषं भुञ्जीत वाग्यतः ॥२॥

उच्छिष्टं च प्रदातव्यं भार्यायै पुत्रमिच्छता ।
धेन्वाः सरूपवत्सायाः पयसा साधयेच्चरूम् ॥३॥

अनुरूपं प्रजामाशु लभते नात्र संशायः ।
स्वस्त्यात्रेयं जपेन्नित्यं प्रातः प्रातर्द्विजः शुचिः ॥४॥

एतत्स्वस्त्ययनं पुण्यं सर्वकल्मषनाशनम् ।
सुहृदं ज्ञातिनं चैव गच्छन्तमनुमन्त्रयेत् ॥५॥

(१७)

स्वस्ति पन्थामिति प्रोच्य स्वस्तिमान्व्रजतेऽध्वनि ।
वि जिहीष्व वनस्पते तदिदं च्यावनं स्मृतम् ॥१॥

यं च्यावयितुकाम स्याच्चयावयेत्तमिदं जपन् ।
द्विषन्तं वा पदाऽक्रम्य भूमौ पांसुमयीं कृतिम् ॥२॥

निःपीड्यन्निव सङ्ग्रामाच्च्यवते नात्र संशयः ।
स्त्रियं गर्भप्रमूढां वा पाययेदनुमन्त्रितम् ॥३॥

उदकं च्यावनेनैव गर्भोऽधश्र्च्यवते सुखम् ।
अचा वदोति सूक्तं तु वृष्टिकामः प्रयोजयेत् ॥४॥

निराहारः क्लिन्नवासाऽऽचिरेण प्रवर्षति ।
हुत्वाऽयुतं वैतसीनां क्षीराक्तानां हुताशने ॥५॥

महद्वर्षमवाप्नोति सूक्तेनाच्छावदेन हि ।
य इच्छेद्वरदां देवीं श्रियं नित्यं कुले स्थिताम् ॥६॥

(१८)

स शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥१॥

आवाहयेच्छ्रियं पद्मे पञ्चभिः कनकेऽपि वा ।
उपहारानुपहरेच्छुक्लान्भक्षान् पयो दधि ॥२॥

स्थालीपाकं च शालीनां पयसा सम्प्रकल्पयेत् ।
चान्द्रामणकृतात्मा तु प्रपद्येत्प्रयतः श्रियै ॥३॥

सर्वौषधिभिः फण्टादिभिः स्नात्वाऽद्भिः पावनैरपि ।
उपैतु मां देवसख इति राज्ञोऽभिषेचनी ॥४॥

मनसः काममित्येषा पशुकामाभिषेचनी ।
कर्दमेनेति यः स्नायात्प्रजाकामः शुचिव्रतः ॥५॥

(१९)

अश्वपूर्वामिति स्नायाद्राज्यकामः शुचिव्रतः ।
रोहिते चर्मणि स्नायाद् ब्राह्मणस्तु यथाविधि ॥१॥

राजा चर्मणि वैयाघ्रे क्षत्रियस्त्वथ रौरवे ।
बस्तचर्मणि वैश्यस्तु होमः कार्यस्त्वनन्तरम् ॥२॥

चन्द्रमिति तु पद्मानि जुहुयात्सर्पिषा द्विजः ।
आदित्यवर्णे इत्यनया बिल्वहोमो विधीयते ॥३॥

बिल्वेध्म एव वाऽग्निः स्यात्स्थलीश्च जुहुयाद् द्विजः ।
दशसाहस्त्रिको होमः श्रीकामः प्रथमो विधिः ॥४॥

हुत्वा तु प्रयुतं सम्यगनन्तां विन्दते श्रियम् ।
अयुतं शतकृत्वस्तु हुत्वा शुक्लानि सर्पिषा ॥५॥

(२०)

अनन्तामव्यवच्छिन्नां शाश्वतीं विन्दते श्रियम् ।
अशाक्तौ जप एवोक्तो दशसाहस्त्रिको वरः ॥१॥

जप्त्वा तु प्रयुतं सम्यगनन्तं विन्दते श्रियम् ।
अयुतं शतकृत्वस्तु जप्त्वा श्रियमुपाश्नुते ॥२॥

अप्स्वेव जुहुयान्नित्यं पद्मान्युयुतशो निशि ।
दृष्ट्वा श्रियं तूपरमेत्किलासित्वाद् बिभेतु वै ॥३॥

बिल्वाशी बिल्वनिलयो जुह्वद् बिल्वानि सर्पिषा ।
एकविंशतिरात्रेण परां सिद्धिं नियच्छति ॥४॥

येन येन च कामेन जुहोति प्रयतः श्रियै ।
पद्मान्यथापि बिल्वानि स स कामः समृद्ध्यति ॥५॥

(२१)

न जातु कृपणार्थाय श्रियमावाहयत्क्वचित् ।
न यत्किञ्चन कामेन होमः कार्यः कथञ्चन ॥१॥

महद्वा प्रार्थ्यमानेन राज्यकामेन वा पुनः ।
वाचः परं प्रार्थयिता यत्नाद्युक्तः श्रियं यजेत् ॥२॥

अग्निरैत्विति सूक्तेन जुहुयादाज्यमन्वहम् ।
ओजस्विनीमवाप्नोति प्रजां धर्मवतीं शुभाम् ॥३॥

अचा नैत्यृचा दीप्तमुपतिष्ठेद्विभावसुम् ।
प्रज्ञां प्राप्य जपेच्छत्रूंस्तरते दुरितानि वै ॥४॥

आ गाव इति सूक्तेन गोष्ठगो लोकमातरः ।
उपतिष्ठेद्व्रजन्तीश्च य इच्छेत्तः सदाऽक्षयः ॥५॥

त्वां इद् धीति प्रगाथेन उपतिष्ठेच्छतक्रतुम् ।
मध्याह्ने सन्ध्ययोश्चैव जपन्धनमवाप्नुयात् ॥६॥

(२२)

उपेति तिसृभी राज्ञो दुन्दुभीन्संस्पृशेद्रणे ।
ओजो बलमवाप्नोति शत्रूंश्चैव नियच्छति ॥१॥

पाणिना तृणमादाय यज्ञा यज्ञेति योऽभ्यसेत् ।
सोऽधीतस्यास्य सूक्तस्य फलं प्राप्नोति नातृणः ॥२॥

सूक्तान्ते च तृणं त्वग्नाविरिणे वोदकेऽपि वा ।
निक्षिपेत्तत्प्रयत्नेन त्यक्त्वाऽन्यत्र भयावहम् ॥३॥

तृणपाणिर्जपन्त्सूक्तं रक्षोघ्नं दस्युभिर्वृतः ।
न भयं विन्दते क्वचिद्रक्षेभ्योऽरिभ्य एव च ॥४॥

गृहात्प्रपद्यमानस्तु पन्थानं धनकाम्यया ।
जपेत्सोऽध्वनि यत्नेनापि पन्थामिति व्रजन् ॥५॥

ये के जपेमेत्यृचं जप्त्वा ध्यायन्निशि दिवौकसः ।
अग्नौ हुत्वैतया चाज्यं दीर्घमायुरवाप्नुयात् ॥६॥

(२३)

वयं तु त्वेति सूक्तं तु पौष्णं द्रविणवर्धनम् ।
नित्यं जपेच्छुचिर्भूत्वा धनं विन्दत्यभीप्सितम् ॥१॥

यस्य नष्टं भवेत्किञ्चिद्द्रव्यं गौर्द्विपदं धनम् ।
नश्येद्वाऽध्वनि यो मोहात् सं पूषन्स जपेन्निशि ॥२॥

इयमित्येदाद्यन्तं सूक्तं सारस्वतं द्विजः ।
नित्यं जपेच्छुचिर्भूत्वा वाग्मी भवति बुद्धिमान् ॥३॥

सं वां इ इ तु यत्सूक्तमष्टर्च त्रैष्टुभं स्मृतम् ।
तज्जपन्प्रयतो नित्यमिष्टान्कामान्समश्नुते ॥४॥

यो अद्रिभित्तु यत्सूक्तं तत्सपत्ननिबर्हणम् ।
बृहस्पतिं नमस्कृत्वा सपत्नान्स्तृणुते बहून् ॥५॥

(२४)

एनस्वी वाऽभिशस्तो वा कृत्वा वा कर्म गर्हितम् ।
सोमारौद्रं जपेत्सूक्तं कृत्स्नमेनो व्यपोहति ॥१॥

जुहुयाद्वा य एताभिऋग्भिर्नित्यं धृतव्रतः ।
वारुणेभ्यः स पाशेभ्यो मुच्यते शं तथाऽऽप्नुयात् ॥२॥

जीमूतसूक्तस्य विधिं यथालिङ्गमवेक्ष्य वै ।
ऋग्भिः कर्माणि कुर्वीत रथाङ्गानां यथाविधि ॥३॥

संग्रामं तु प्रयातस्य राज्ञश्चैतत्प्रयोजयेत् ।
सर्वाण्यङ्गानि रथ्यांश्च सदश्वंश्चानुमन्त्रयेत् ॥४॥

यमेव देशं गच्छेत शत्रुं वाऽप्यनुमन्त्रितः ।
नाजित्वा विनिवर्तेत परं हि ब्रह्मणो बलम् ॥५॥

(२५)

पुत्रानायुरर्थारोग्यं य इच्छेदव्ययं सुखम् ।
सोऽग्निं नर इति सूक्तेन जुहुयादाज्यमन्वहम् ॥१॥

प्राग्नयेऽथ त्रिभिः सूक्तैः सन्ध्ययोर्जपमारभेत् ।
न रक्षेभ्यो भयं वेत्ति धनं प्राप्नोति चाक्षयम् ॥२॥

अष्टावष्टौ तथा चाष्टावृगित्वेय त्रिपादिकम् ।
अकारादि हकारान्तं जले स्थित्वा द्रुतं जपन् ॥३॥

उपपातककोटीनां ब्रह्महत्यायुतानि च ।
भ्रूणहत्याकृतं पापं तत्क्षणादेव नश्यति ॥४॥

अग्निं दूतं पुरो दधे अग्ने रक्षा णे अंहसः ।
अदाभ्येन शोचिषाऽग्न इहावसे ॥५॥

अभित्त्वा यः प्रगाथेन नित्यमर्चति वज्रिणम् ।
स श्रियं विपुलां भुंक्ते प्राप्नोति च धनायुषी ॥६॥

वसिष्ठेन पुरा गीता महदद्भुतमार्जनम् ।
विश्वामित्राभिचारेषु महद्रक्षोनिवारणम् ॥७॥

यः प्रातरिति सूक्तं तु स्त्रीकामः सततं जपेत् ।
लभते सदृशीं कन्यां दीर्घमायुः स्वरूपिणीम् ॥८॥

उत्तरस्याद्यमाचार्यो जुहुयाद्वास्तुकर्मणि ।
स्नातः कृत्वा वैश्वदेवं परं ब्रह्मेदमुच्यते ॥९॥

शंवती शं न इन्द्राग्नीत्येतेसततं जपेत् ।
न रक्षेभ्यो न भूतेभ्यो व्याधिभ्यो वा भयं भवेत् ॥१०॥

निवेष्टुकामो रोगार्तो भगसूक्तं सदाऽभ्यसेत्।
निवेशं विन्दते क्षिप्रं रोगेभ्यश्च प्रमुच्यते ॥११॥

(२६)

इमा इति जपेन्नित्यं रौद्रं सूक्तं द्विजः शुचिः ।
तज्जपन्प्रजया वित्तैः स्वयं चैव न रिष्यति ॥१॥

उत्तितीर्षुरपो यस्तु शङ्केत्स्रोत्या समागमे ।
समुद्रज्येष्ठा इति जपेत्सूक्तमेतद्भयापहम् ॥२॥

आदित्यदैवते सूक्ते रिपुघ्ने रोगनाशने ।
जपेत्प्रातः शुचिर्भूत्वा रिपुरोगैः प्रमुच्यते ॥३॥

वास्तोष्पते प्रतीत्येतत्सूक्तं वास्तोष्पतं जपेत् ।
स्नातः कृत्वा वैश्वदेवं परं ब्रह्मेदमुच्यते ॥४॥

अमीवहेति सूक्तेन भूतानि स्वापयेन्निशि ।
न हि प्रस्वापनं किञ्चिदीदृशं विद्यते क्वचित् ॥५॥

(२७)

सम्बाधे विषमे दुर्गे बद्धो वा निर्गतःक्वचित् ।
पलायन्वा गृहीतो वा तस्करैः स जपेदिदम् ॥१॥

अमीवहा विश्ववतीमुद्धृत्यान्याः प्रयोजयेत् ।
सूक्तमेतज्जपेत्सर्वमिति मन्येत शौनकः ॥२॥

त्रिरात्रं नियतोऽनश्नंच्छ्रपमेत्पायसं चरूम् ।
तेनाहुतिशतं पूर्णं जुहुयात्सर्पिषा द्विजः ॥३॥

समुद्दिश्य महादेवं त्र्यम्बकं त्र्यम्बकेत्यृचा ।
एतत्पर्वशतं कृत्वा जीवेदब्दशतं शुची ॥४॥

तच्चक्षुरित्यृचा स्नात उपतिष्ठेद्दिवाकरम् ।
उद्यन्तं मध्यगं चैव दीर्घमायुर्जिजीविषुः ॥५॥

(२८)

रात्र्या अपरकाले य उत्थाय प्रयतः शुचिः ।
व्युषा इत्युपतिष्ठेत षड्भिः सूक्तैः कृताञ्जलिः ॥१॥

प्राप्नुयात्स हिरण्यादि नानारूपं धनं बहु ।
गा अश्वान्पुरुषान्धान्यं स्त्रियो वासांस्यजाविकम् ॥२॥

ध्रुवासु त्वासु क्षितिषु जपन्बद्धः प्रमुच्यते ।
तिष्ठन् रात्रौ जपेदेनं विपाशः सम्प्रपद्यते ॥३॥

अहोरात्रं स्थितश्चैमनश्नन्स्याद्विवेष्ठितः ।
अयः पाशा स्फुटन्त्यस्य दारुपाशास्तथैव च ॥४॥

स्योनेति पृथिवीं देवी प्रपद्येन्नियतः सदा ।
जपेदेनां च तत्रापि भूमिपाशात्प्रमुच्यते ॥५॥

(२९)

यत्किञ्चित्पातकं कुर्यात्कर्मणा मनसा गिरा ।
यत्किञ्चेदं वरुणेति ऋचं जप्त्वा प्रमुच्यते ॥१॥

अगम्यागमने चैतत्प्रायश्चित्तं विधीयते ।
अन्यत्र गुरूतल्पाच्च तस्मात्पापात्प्रमुच्यते ॥२॥

द्वादशाहमभुञ्जानः स्वगोत्रगमने जपेत् ।
अर्धमासमभुञ्जानः सखिदारेषु संवसन् ॥३॥

इदमापः प्रवहत यत्किञ्चेदं ऋचं पुनः ।
इति चैता जपेदपः प्रविश्यैतेषु कर्मसु ॥४॥

इन्द्राविष्णू नमस्कृत्य जुहुयादाज्यमन्वहम् ।
सूक्ताभ्यां पर एताभ्यां य इच्छेद्भूतिमात्मनः ॥५॥

(३०)

आस्यदघ्नं विगाह्याम्भः प्राङ्मुखः प्रयतः शुचिः ।
सूक्ताभ्यां तिस्र एताभ्यामुपतिष्ठेद्दिवाकरम् ॥१॥

अनश्नता तु जप्तव्यं वृष्टिकामेन यत्नतः ।
पञ्चरात्रे व्यतीते तु महद्वर्षमवाप्नुयात् ।।२।।

योऽरिभिः प्रतिपद्येत अभिशस्येत वा मृषा ।
उपोष्यैकं त्रिरात्रं स जुहुयादाज्यमन्वहम् ।।३।।

इन्द्रासोमोति सूक्तं तु जपेच्चैतच्छतावरम् ।
किञ्चिदद्याद् द्विजेभ्योऽन्ते स्तृणुते सर्वशास्त्रवान् ।।४।।

यस्य लुभ्येद् व्रतं मोहाद् व्रात्यैर्वा संस्पृशेद् द्विजः ।
उपोष्याज्यं च जुहुयात् त्वमग्ने व्रतपा इति ।।५।।

प्र संराजं इति त्वेतज्जपन्नीक्षेद्दिवाकरम् ।
उद्यन्तमुपतिष्ठेत स्नात्वा स्नात्वा दिने दिने ।।१।।

आभियुक्तो भवेद्यस्तु विवदेद्वाऽपि केनचित् ।
निर्जित्य सगणान् छत्रून्क्षिप्रं वादं पराजयेत् ।।२।।

शं अग्निभिश्चेति प्रपद्येद्वायुभास्करौ ।
अग्नि प्रथमतः स्तुत्वा महत्कृच्छ्रात्प्रमुच्यते ।।३।।

न हीति यश्चतुष्केण स्नात्वा वै प्रातरुत्थितः ।
द्वौ मासावुपतिष्ठेत स त्रायति भयात्स्वयम् ।।४।।

तृचं जप्त्वाऽऽयदित्येत्स्नात्वाऽभ्यर्च्य पुरन्दरम् ।
प्राप्नुयान्मानसान्कामान् संपूज्य वसुरोचिषः ॥५॥

आद्यानि त्रीणि सूक्तानि पञ्च चाग्रे बृहन्निति ।
षट् तथाऽन्त्यानि सूक्तानि अग्नि नर इतीति च ॥६॥

प्र कृतानीति चाध्यायं भोजनात्प्राक् पठेदिदम् ।
सर्वान्कामानवाप्नोति मुच्यते सर्वकिल्बिषैः ॥७॥

(३२)

प्राग्भोजनमिदं ब्रह्म मानवानां महर्षिणाम् ।
पूर्वाह्णे जपतो नित्यमर्थसिद्धिः परा भवेत् ॥१॥

अग्निनेत्याश्विनं सूक्तं चतुर्विंशकमन्वहम् ।
जपेत्प्रातः शुचिर्भूत्त्वा नासत्यावर्च्य सुव्रतः ॥२॥

प्राप्नुयात्परमां ऋद्धिं द्रविणं चोर्जमेव च ।
समिधेति जुहोत्यग्नौ सूक्तेन प्रत्यृचं घृतम् ॥३॥

स सिद्धिमतुलां प्राप्य समानां जीवते शतम् ।
द्विचत्वारिंशकेनेह सूक्तेनाघेति वज्रिणो ॥४॥

सख्यं लब्ध्वा महेन्द्रेण सपत्नान् स्तृणुते बहून् ।
प्रश्नीयाज्जपतोऽन्नानि प्रश्नं कृत्वाऽप्रमाणतः ॥५॥

(३३)

तस्मात्पूर्वाह्णिकोऽध्यायः स्मृतोऽयं रिपुनाशनः ।
वाशं महीति च जप्त्वा प्राप्नोत्यारोग्यमेव च ॥१॥

दुःस्वप्नघ्नीः परा जप्त्वा प्रातः पापैः प्रमुच्यते ।
शं नो भवेति द्वाभ्यां तु भुक्त्वाऽन्नं प्रयतः शुचिः ॥२॥

हृदयं पाणिना स्पृष्ट्वा ज्योग्जीवेदगदः सुखी ।
यतो भयं विजानीयात् तस्यां दिशि यतव्रतः ॥३॥

शुचौ देशेऽग्निमाधाय जुहुयादिन्द्रमर्च्य च ।
यत इत्याज्यमुत्पूतं षड्भिर्गन्धान्निवेद्य च ॥४॥

पायसं दधिमन्थं वाऽपूपान्वाऽप्युपहारयेत् ।
अहोरात्रमुपोष्यैकं तिलान्वा घृतमेव वा ॥५॥

(३५)

उत् त्वा मन्दन्त्विति स्नातो हुत्वा शत्रून्प्रमापयेत् ।
बद्धो वाऽप्यरुद्धो वा वाग्यतः प्रयतो जपेत् ॥१॥

त्यान्वित्यादित्यिदैवतं सद्यो मुच्येत बन्धनात् ।
यद्द्यावेति जपेन्नित्यं प्रगाथं नियतः शुचिः ॥२॥

स कीर्तिमतुलाः प्राप्य सर्वान् कामान्त्समश्नुते ।
त्वं नो अग्न इति सूक्तेन हुत्वाऽर्च्याग्निं घृतेन तु ॥३॥

पालितो विश्वतो दीप्त्या प्राप्नुयाद्वह्निना रयिम् ।
आ तू सूक्तेन सततं धनं याचेत्पुरंदरम् ॥४॥

प्र समित्पाणये तस्मै धनं यच्छति वृत्रहा ।
कन्या वारिति सूक्तं तु सततं नियतो जपेत् ॥५॥

(३५)

त्वग्दोषिणं तथाऽलोम्नीं क्षिप्रं तस्मात्प्रमोचयेत् ।
यदद्य कच्चेत्युदिते रवौ स्तुत्वा पुरंदरम् ॥१॥

गृणन्नपोहते रिप्रं वश्यं वा कुरुते जगत् ।
यद्वागिति द्वचेनैव गौरीं योऽर्चति सुव्रतः ॥२॥

तस्य नासंस्कृता वाणी मुखादुच्चरते क्वचित् ।
बण् महाँमिति दृष्ट्वाऽर्कमुपतिष्ठेद्द्वचं पठन् ॥३॥

ब्रुवन्नप्यनृतां वाणीं लिप्यते नानृतेन सः ।
पूर्णे चन्द्रमसि ज्योत्स्नामियम्येत्यनुषेवयेत् ॥४॥

चन्द्रदृष्टिस्त्वनिमिषो वर्चस्वी दृष्टिमान्भवेत् ।
प्रजा इति जपन्स्नात्वा न योनिं प्रतिपद्यते ॥५॥

मातेति गामुपस्पृश्य जपन्गास्तु समश्नुते ।
वचोविदमिति त्वेतां जपन्वाचं समश्नुते ॥६॥

पावमानं परं ह्येतन्नवमं मण्डलं जपेत् ।
स्नात्वा शुचिः शुचौ देशे सपवित्रः सकाञ्चनः ॥७॥

॥इत्यृग्विधाने द्वितीयोऽध्यायः समाप्तः॥

॥अथ तृतीयोऽध्यायः॥

॥ॐ॥

(१)

स्वादिष्ठयेति गायत्रीः पावमानीर्जपेद् द्विजः ।
पवित्राणां पवित्रं नउुपावमानीऋचो जपेत् ॥१॥

प्रयतोऽप्सु निमज्ज्याशु सर्वपापैः प्रमुच्यते ।
एतासां कीर्तनं पुण्यं स्मरणं धारणं तथा ॥२॥

याथातथ्येन तु ज्ञात्वा ब्रह्मलोकं समश्नुते ।
एतेषां तु यथोक्तानां गुणवद्यद्यदुत्तरम् ॥३॥

कीर्तनात्तु भवेत्पूतः स्मरणात्स्मरते परम् ।
धारणाद् ब्रह्मतामेति पूतात्मा विजितेन्द्रियः ॥४॥

यथातथ्येन च ज्ञात्वा ब्रह्मणो विन्दते पदम् ।
श्रावयेद्देवता कृत्ये ब्राह्मणान्भुञ्जतोऽग्रतः ॥५॥

(२)

प्रीणाति देवतां तच्च समर्धयति कर्म च ।
पित्र्ये पितॄन् प्रीणयन्ति श्राविताः प्रयतात्मना ।।१।।

कृत्वा दोषान्त्सुमहतोऽप्यपेयादीन्प्रपीय च ।
जप्त्वा तरत्समन्दीयं प्रविश्यापस्त्यहाच्छुचिः ।।२।।

अक्षय्यं च भवेद्दतं पितृभ्यः परमं मधु ।
यः पावमानीरध्येति पूतात्मा विजितेन्द्रियः ।।३।।

तस्य कामदुघा भूत्वा उपतिष्ठन्ति धेनवः ।
आयुर्बलं यशो वित्तं प्रजां कीर्तिमनामयम् ।।४।।

स्वाध्यायपुण्यमतुलं पूतः प्राप्नोति चाक्षयम् ।
अशक्तस्तु जपेद्युक्तस्त्रिंशद्द्वैखनसीर्ऋचः ।।५।।

सप्तर्षिभिश्च याः प्रोक्ताः पवित्रस्य च याः पराः ।
ऋचां द्विषष्टिः प्रोक्तेयं पवस्वेत्यृषिसत्तमैः ।।६।।

(३)

सर्वकल्मषनाशाय पावनाय शिवाय च ।
स्वादिष्टयेति सूक्तानां सप्तषष्टिरिहोदिता ।।१।।

दशोत्तराण्यृचांश्चैव पावमानीः शतानि षट् ।
एतज्जुह्वन् जपंश्चैव घोरं मृत्युभयं जयेत् ॥२॥

व्याधिभ्यः परिमोक्षं च लभते नात्र संशयः ।
प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम् ॥३॥

जपंस्तरत्समन्दीयं प्रविश्यापस्त्रहाच्छुचिः ।
पावमानं परं ह्यतेद्रपसामपनोदनम् ॥४॥

प्राणानायम्य च ध्यायेदन्ते देवान्पितॄनृषीन् ।
उपोष्याज्यं च जुहुयादग्निं सोमं च पूजयेत् ॥५॥

सरस्वतीं चार्चयीत पयोम्बु मधुसर्पिषा ।
आध्यात्मिकं पवित्रं ते सूक्तं जप्त्वा ऽऽ प्लुतः शुचिः ॥६॥

(४)

गतिमिष्टामवाप्नोति विन्दते चेह वृद्धयः ।
मण्डलं पावमानं तु जपेल्लक्षमुपोषितः ॥१॥

नाशयेद् ब्रह्महत्यां वै वसिष्ठवचनं यथा ।
नानानमिति सूक्तानि अन्तकाले जपेत्सकृत् ॥२॥

जप्त्वा चैव परं स्थानममृतत्वं च गच्छति ।
आपो हि ष्ठेति नियतः प्रयुञ्जीत सदा द्विजः ॥३॥

स्नानार्थं शुद्धिकामस्तु जपेत त्रिः समाहितः
अप्सु चैव निमज्जित्वा त्रिः पठेत्सुसमाहितः ॥४॥

ब्रह्महा तु कपालेन खट्वाङ्गी चीरसंवृतः ।
चरेद् द्वादशवर्षाणि स्वकर्म परिकीर्तयन् ॥५॥

अजपन्मनसैवैतदपो हि ष्ठेति संस्मरेत् ।
ऊर्ध्वं तु पञ्चमाद्वर्षाज्जपेदेव सहस्रशः ॥६॥

अपरस्तु त्रिसाहस्रो जप स्यात्प्रत्यहं सदा ।
पूर्णे तु द्वादशे वर्षे ब्रह्महा विप्रमुच्यते ॥७॥

(५)

समेत्य ब्राह्मणान्ब्रूयुरथ तं चरितव्रतम् ।
अचरितं भवेत्किञ्चिन्मिथ्यावादी पतेत्पुनः ॥१॥

दशावरान्दश परान्हन्यास्त्वमनृतं वदन् ।
ओं भो इति वदेद्विप्रैरनुज्ञातः शुचिर्जपेत् ॥२॥

स्थालीपाकं च कुर्वीत सोऽग्नये व्रतचारिणे ।
एवं स मुच्यते पापात्सावित्रीं प्रतिपद्य च ॥३॥

ब्रह्महा तु पुरा शक्रस्त्वष्टारं हत्वा त्वृषिं प्रभुम् ।
सिन्धुद्वीपस्तमेताभिरभिषिच्य व्यमोचयत्॥४॥

ब्रह्मस्वं च गुरोर्द्रव्यं स्तेयं कृत्वा जपन्निमाः ।
अनेनैव विधानेन षड्भिर्वर्षैः प्रमुच्यते ॥५॥

(६)

ब्रह्महा सुरापश्च नियमेन जपन्निमाः ।
अनेनैवोपचारेण ब्रह्मघ्न इव मुच्यते ॥१॥

ब्राह्मणस्य रुषोद्यम्य जपेदेता निपात्य च ।
त्र्यहं निपात्योपवसेदेकाहमवगूर्य च ॥२॥

शोणितं तुं प्रहारेणोत्पाद्य स कथंचन ।
त्रिरात्रमेवोपवसेज्जपेदेताः प्रसाद्य तम् ॥३॥

प्रातरुत्थाय सततं कुर्यान्मार्जनमात्मनः ।
रात्रौ कृतस्य पापस्याविज्ञातस्य निष्कृतिः ॥४॥

सायं च नित्यमेताभिः कुर्यान्मार्जनमात्मनः ।
दिवा कृतस्य पापस्याविज्ञातस्य निष्कृतिः ॥५॥

(७)

उपतिष्ठेत राजानं यमं सूक्तेन वै द्विजः ।
स्थालीपाकं च कुर्वीत पक्षयोर्यमदैवतम्॥१॥

अष्टम्यां च चतुर्दश्यां यजेत हविषा यमम् ।
परेयिवां समित्येतत्सूक्तमत्र प्रयोजयेत् ॥२॥

पुरा ऽऽ युषः प्रमीयेत न जातु स कथंचन ।
प्रीयते ऽ स्य यमो राजा स्मृतिं चान्ते प्रयच्छति ॥३॥

धर्मराजाय स्वाहेति मन्त्रान्ते जुहुयाद्धविः ।
वैशाख्यं पौर्णमास्यां तु कर्म नित्यं प्रयोजयेत् ॥४॥

अयने पर्वसु स्नात्वा यः प्रदद्यात् तिलोदकम् ।
यमाय सगणायैव तद्भयं न स विन्दते ॥५॥

मृत्युमेव प्रपद्येत परं मृत्यो जपन् द्विजः ।
नक्तभोजी मिताहारः परि संवत्सरं सदा ॥६॥

(८)

नैनं पुराऽऽयुषो मृत्युर्नयते ससुतप्रजम् ।
फलाहारो जयेन्मृत्युं त्रिभिर्वर्षैर्मिताशनः ॥१॥

षष्ठे काले तु भुञ्जीत फलं मूलमथापि वा ।
स्थानासनाभ्यां विहरेदुदके शिशिरे वसेत् ॥२॥

ग्रीष्मे पञ्चतपस्तु स्याद्वर्षास्वभ्रावकाशकः ।
एवं युक्तो जयेन्मृत्युं रोगेभ्यश्च प्रमुच्यते ॥३॥

भ्रातुर्भार्यामपुत्रस्य सन्तानार्थं मृते पतौ ।
देवरो ऽ न्वारुरुक्षन्तीमुदीर्ष्वेति निवर्तयेत् ॥४॥

ऋतुकाले तु संप्राप्ते घृताभ्यक्तोऽथ वाग्यतः ।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथञ्चन ॥५॥

दशाक्षरं तु शान्त्यर्थं भद्रं न इति संस्मरेत् ।
नित्यं जपेच्छुचिर्भूत्वा मानसं विन्दते सुखम् ॥६॥

(९)

फलाहारो भवेन्मासं मासं चापः पिबेत्ततः ।
वायुभक्षो भवेन्मासं जपन्नेतत्सहस्रशः ॥१॥

मनसैवास्य सिद्ध्यन्ति सर्वे कामाः समीहिताः ।
दिव्यान्पश्यति गन्धर्वान्सिद्धान्पश्यति चारणान्॥२॥

अन्तर्धानं व्रजत्यस्माल्लोकादाकाशगो भवेत् ।
दूरात्पश्यति दूराच्च शृणोति परमेष्ठिवत् ॥३॥

प्र देवत्रेति नियतो जपेत मरुधन्वसु ।
प्राणान्तिके भये प्राप्ते क्षिप्रमम्भः स विन्दति ॥४॥

बैभीदकामंस्तु त्रीनक्षान्गन्धैः समभिवासयेत् ।
पुष्पैरवकिरेच्चैनान्स्थापयित्वा विहायसि ॥५॥

(१०)

संहत्य पादौ तां तिष्ठन्नक्षस्तुतिं जपेत् ।
प्रावेपा मा ऋचं त्वेतांमनसैव जपेन्निशि ॥१॥

व्युष्टायामुदिते सूर्ये जपन्नादेवनं व्रजेत् ।
एतामेव जपेन्नित्यं जयत्यन्यैर्न जीयते ॥२॥

यमेव जेतुमिच्छेत स्पृष्ट्व मूर्धनिं तं जपेत् ।
सूक्तशेषं जयत्यन्यान् जीयते न स केनचित् ॥३॥

अबुध्नं उषासानक्तेत्येते स्वस्त्ययने जपेत् ।
नमो मित्रस्य वरुणस्य चक्षस इति नित्यशः ॥४॥

अस्यैव चोत्तमर्गेका ययौनोभ्यः प्रमुच्यते ।
तया ऽऽ ज्यं जुहुयान्नित्यमेनोभ्यो विप्रमुच्यते ॥५॥

(११)

दिवस्परीति सूक्तं तु जपेच्छ्रद्धासमन्वितः ।
सर्वत्र लभते श्रद्धां श्रद्धाकामः समाहितः ॥१॥

मा प्र गामेति च जपेत्समूढो गहने पथि ।
स्वस्तिमानेति पन्थानं विन्दते च परं सुखम् ॥२॥

क्षीणायुरिति मन्येत यं किञ्चित्सुहृदं प्रियम् ।
यत्ते यममिति स्नातस्तस्य मूर्धानमालभेत् ॥३॥

सहस्रकृत्वः पञ्चाहं जपेदायुर्लभेत सः ।
घृतेन सिन्धुद्वीपस्य सूक्तेनैनं प्रलेपयेत् ॥४॥

संरविशञ्छयने नित्यमेतं मन्त्रं जपेत वै ।
पुत्रान्भार्यां प्रियं चान्यमात्मानं संस्पृशेत्ततः ॥५॥

(१२)

जीवावृत्तिं प्रयुञ्जीत नित्यमेतं घृतेन तु ।
स्रोतांस्यभ्यज्य सर्वाणि सुखी भवति विज्वरः ॥१॥

इदमित्थेति मन्त्रोऽयं सहस्रमनिरुच्यते ।
अर्धमासं हविष्यान्नमर्धमासं पयः पिबेत् ॥२॥

उपोष्य चापरं पक्षं अरण्ये स्थण्डिले शुचौ ।
औदुम्बरेध्मं प्रज्वाल्य जुहुयात्पावके घृतम् ॥३॥

स्रुक्स्रुवौ चमसश्चैव सर्वमौदुम्बरं भवेत् ।
हुत्वा ऽऽ हुतिसहस्रं तु तेन कामेन युज्यते ॥४॥

अमोघमेव कर्मैतज्जानीयात्सिद्धिमेव तु ।
व्यर्थमप्यर्धमेवैतत्फलस्या प्रयच्छति ॥५॥

(१३)

चतुष्पथे चान्नकाम आदित्याभिमुखो घृतम् ।
जुहुयाद्धनकामस्तु सहस्रं भोजयेद् द्विजान् ॥१॥

पशुकामो जपेद्गोष्ठे जुहुयाद्वा ऽ प्युपोषितः ।
विधिनाऽनेन नियतः सहस्रं विन्दते पशून् ॥२॥

लोहलोहितहेमानां कारयेत् त्रिवृतं मणिम् ।
सहस्रं समिधां चैव सम्पाताभिहुतो भवेत् ॥३॥

कृत्वा सहस्रसम्पातं शिरसा धारयेत्तु तम् ।
पाणिना वा शुचिर्भूत्वा सहस्रानुचरो भवेत् ॥४॥

परावतः स्वस्त्ययनं स्नातकस्य विधीयते ।
स्वर्गकामश्च तं नित्यं जपेत नियतव्रतः ॥५॥

(१४)

बृहस्पते प्रथममिति नित्यं ज्ञानस्तुतिं जपेत् ।
ज्ञानवान्भवति श्रीमाननन्तं विन्दते श्रियम् ॥१॥

अलक्ष्मीनाशानार्थं तु पयोभक्षो भवेद् द्विजः ।
वयः सुपर्णा इत्येतां जपन्वै विन्दते श्रियम् ॥२॥

तमसा परिवृतो यस्तु मन्येतात्मानमात्मनि ।
अश्रिया वा ऽ प्यथाविष्टो जपन्नेतां प्रमुच्यते ॥३॥

अक्षिणी प्रातरुत्थाय विमृजीतैतया सदा ।
चक्षुष्मान्भवति श्रीमानलक्ष्मींश्च प्रबाधते ॥४॥

न तं विदाथेत्येतां तु जपन् विप्रः समाहितः ।
विहाय कल्मषं सर्वं ब्रह्माभ्येति सनातनम् ॥५॥

अनया पर्वसु स्नात्वा यः प्रददाति तिलोदकम् ।
यमाय सगणायैव तद्भयं न स विन्दति ॥६॥

यस्ते मन्यो इति सदा सपत्नघ्ने त्विमे जपेत् ।
घृतेनाभिहुतं चाभ्यां धारयेदायसं मणिम् ॥७॥

(१५)

जुहुयादायसं शङ्कुमाभ्यामेव चतुर्दशीम् ।
खादिरे सुसंसिद्धेऽग्नौ सपत्नान्प्रतिबाधते ॥१॥

यथा हि परमं ब्रह्म गुह्यं पावनमद्भुतम् ।
तथा संवननं हृदयं न ह्यस्माद्विद्यते परम् ॥२॥

उपोष्य द्वादशाहनि जपन्नेतं ऋषिं सदा ।
तन्मनाः प्रयतः स स्यात् त्रिरह्नोऽभ्युपयादपः ॥३॥

अन्ते तु द्वादशाहस्य शुचौ देशे समाहितः ।
पुंसः प्रतिकृतिं कुर्याद्भूमौ पांसुमयीं तथा ॥४॥

तस्या हृदयदेशं तु समाक्रम्य जपेदृषिम् ।
अमोघं कर्म जानीयादहोरात्रे गते सति ॥५॥

(१६)

त्र्यहेण धनिनं वैश्यं चतूरात्रेण क्षत्रियम् ।
राजानं पञ्चरात्रेण षड्रात्रेण द्विजोत्तमम् ॥१॥

तपस्विनं सप्तरात्राज्जयेद् भुञ्जीत चैव तम् ।
अपि वोपोषितः स्नातो जपेदेतत्सदा स्थितः ॥२॥

य इच्छेदात्मनः कर्तुं हीनं तु परिवर्जयेत् ।
सहस्रसम्पातहुतं बिल्वानां चूर्णमावपेत् ॥३॥

उदपाने वशं नेतुं तं जनं क्षिप्रमानयेत् ।
मातर्यात्मनि पुत्रेषु पितृभ्रातृसुहृत्सु च ॥४॥

हृदयमेतत्प्रयुञ्जीत शिरसा धारयेद् गुडम् ।
सुमित्रं तु परिष्वज्य मूर्धन्याघ्राय चात्मजम् ॥५॥

(१७)

हृदयमेतत्प्रयुञ्जीत शान्त्यर्थाय सुखाय च ।
असंसिद्धे संवनने पांसुप्रतिकृतिं पथि ॥१॥

प्रज्वाल्य जुहुयादग्निं घृतेन ब्राह्मणे यदि ।
क्षत्रियस्य तु तैलेन सार्षपेण विशामपि ॥२॥

आयसीं वै प्रतिकृतिमग्निमध्ये निधापयेत् ।
तां च प्रज्वलितां मत्वा जुहुयात्तन्मनाःशुचिः ॥३॥

उग्रेण मनसा हन्यात्क्रुद्धश्च जुहुयााद् घृतम् ।
यथा यथा प्रज्वलिते हूयते जातवेदसि ॥४॥

दीप्ता प्रतिकृतिर्विप्रस्तथा स्वं वशमेष्यति ।
श्मशानदग्धपांसूनां कुर्याद्वेदिं विलक्षणम् ॥५॥

(१८)

बैभीतकेध्मे ज्वलिते लोहप्रतिकृतिं न्यसेत् ।
अर्धरात्रे स्थिते तैलं सार्षपं लवणान्वितम् ॥१॥

तत्र शरमयं कुर्यात्प्रस्तरं प्रतिलोमतः ।
त्रिषु शङ्कुषु चासीनो जुहुयादुग्रदर्शनः ॥२॥

मुक्तकेशो वधं प्रेप्सुरचिरेण प्रसादयेत् ।
अथवाऽभिचरेदेवं जुहुयादात्मशोणितम् ॥३॥

वशं नयति राजानं क्षिप्रं जनपदं पुरम् ।
पुष्टिकर्माऽपि कर्तव्यं हृद्येनोक्तं यतात्मना ॥४॥

अनागसि न कुर्वीत ब्रह्मणो वधसंयुतम् ।
सरूपवत्सायाश्च गोः पयसा साधयेच्चरुम् ॥५॥

(१९)

सहस्रसम्पातहुतं पाययेद्वत्समग्रजम् ।
सहस्रानुचरो वत्सः स स्याद्रोगैर्विवर्जितः॥१॥

गाश्चैव पाययेत्ताश्च भवन्ति व्याधिवर्जिताः ।
पुत्रांश्च प्राशयेन्नित्यं प्रियानन्यांश्च सज्जनान् ॥२॥

निरामयांश्च स्निग्धाश्च भवन्ति विगतज्वराः ।
स्त्रियं चेदभिमन्येत तस्याः संवननं महत् ॥३॥

व्रीहिणां नखभिन्नानां तण्डुलान्त्सूक्ष्मचूर्णितान् ।
सहस्रसम्पात हुतान्स्वेदयेत्कुशलोऽग्निना ॥४॥

तेन प्रतिकृतिं कुर्यात्तां ध्यात्वा मनसा स्त्रियम् ।
अक्तां सर्षपतैलेन जुहुयादङ्गशश्च ताम् ॥५॥

(२०)

पादौ प्रथमतश्छिन्द्यात् फडित्यग्नौ निधापयेत् ।
अथ जंघे जानुनी चोरू बाहू ततःशिरः ॥१॥

छित्वा हृदयदेशं तु हृदये स्वे निवेशयेत् ।
जपन्निमं ऋषिं विप्रः स्त्री वशं साऽधिगच्छति ॥२॥

नैतत्परिगृहीतासु न साध्वीषु कथंचन ।
न धर्मव्रतशीलासु कुर्वीत द्विजसत्तमः॥३॥

कामं परिगृहीतासु हीनवर्णासु यश्चरेत् ।
पतिमस्या गुणीकुर्यात्पूर्वं पश्चात्तु तां स्त्रियम् ॥४॥

भुक्त्वा वा पायसं सद्यश्छर्दयित्वा निधापयेत् ।
तच्च चूर्णं कृष्णजायायै देयं संवननं स्मृतम् ॥५॥

(२१)

महावृक्षफलान्येवमयुग्मान्यभिमन्त्रयेत् ।
तषां युग्मानि भुञ्जीथ स्वयमर्धानि शेषयेत् ॥१॥

तानि दद्याद्यमिच्छेत्तु वशीकर्तुं जपनृषिम् ।
सुहृद् भूत्वा ऽ सुहृद्यस्य देयं संवननं स्मृतम् ॥२॥

एकैकमभिरूपं तु हृद्यसूक्ताद्यतः पुनः ।
कर्माणि त्वभिरूपाणि कुर्याद्यस्तु यथेच्छति ॥३॥

पराकदासस्य विधिं हृद्येनोक्तं विदुर्बुधाः ।
स्त्रीणां संवननं चैतत् पुंसामपि विधीयते ॥४॥

द्वेष्यं तु ज्ञातीनामेव जयश्चैव सदा युधि ।
खादिरं कारयेच्छङ्कुं हृदि तं संनिवेशयेत् ॥५॥

(२२)

कृत्वा प्रतिकृतिं पूर्वं पांसुभिर्वाऽथवा तुषैः ।
इषुमप्यनुमन्त्रैव संग्रामं संप्रकल्पयेत् ॥१॥

रिपुघ्नमेतज्जानीयात्प्रयुक्तमपराजितम् ।
पराकदास द्वेष्यार्थं हृदयं संवननं स्मृतम् ॥२॥

चिन्तयन्मनसा ऽ प्येते सूक्ते सिद्धिं नियच्छति ।
सूर्यायै भाववृत्तं तु श्रावयेत्कन्यकां पिता ॥३॥

अनुरूपं सुसदृशं भर्तारं तेन विन्दति ।
इमामिति जपेत्कन्या नाभिमालभ्य नित्यशः ॥४॥

एवमेव जपेद्भर्ता ततो दीर्घायुषौ तु तौ ।
स्नापयेदभिरूपैश्च भ्राता कन्यां पिताऽपि वा॥५॥

(२३)

दशपुत्रवती भवेन्न च भर्ता वियुज्यते ।
संराज्ञीति जपेन्मूर्ध्नि कन्यामालभ्य नित्यशः ॥१॥

श्वश्रूश्वशुरदेवरैर्ननान्द्रा वाऽपि पूज्यते ।
इन्द्राण्याः कृतसंवादं स्नाने सूक्तं प्रयोजयेन् ॥२॥

नव वर्गोत्तमयुतं पतिसौभाग्यपुत्रदम् ।
जलपुष्पोत्करयुते चित्रकुम्भसमावृते ॥३॥

कर्तव्योऽत्र तथा यागः सोमगन्धर्ववह्निनाम् ।
भगायाप्सरसां चैव यक्षाधिपतये ऽपि च ॥४॥

इन्द्राण्यै देवपत्नीनां रतिप्रद्युम्नयोस्तथा ।
नदीसलिलसम्पूर्णैः पञ्चगव्यसमावृतैः ॥५॥

(२४)

हुत्वाऽग्निं स्नापयेत्कन्यां स्थितां देशे तु दक्षिणे ।
प्रियङ्गुवटनागानां कषायोद्घृष्टकेसरम् ॥१॥

सम्पाताभिहुतंकृत्वा सर्वौषधिसमन्वितम् ।
अभिमन्त्र्येह सूक्तान्ते नवभिस्तु वि हीति वै ॥२॥

स्थेयाभिरद्भिः पूर्णेनाभिषिञ्चेदुपोषिताम् ।
यः पतिघ्न्य स्त्रियस्तन्व्यः शाम्यन्ते तास्त्वनेन वै ।।३।।

स्नापयेदाहनस्याभिर्विद्याद्यां विप्रव्राजिनीम् ।
सूक्तादुपोद्धरेदेनं न सेश इति तु तद्वृचम् ।।४।।

उपदिष्टो ऽ यमेकेषां पुसः कर्मणि पौरुषे ।
रक्षोहणं वाजिनमित्येतद्रक्षोहणं जपेत् ।।५।।

(२५)

अग्निं प्रज्वाल्य चैतेन उपतिष्ठेत नित्यशः ।
आज्याहुतीश्च जुहुयात्तेन रक्षांसि बाधने ।।१।।

एतद्रक्षोहणं शान्तिः परमैषा प्रकीर्तिता ।
हविष्पान्तीयमित्येतत्सूक्तंमत्र प्रयोजयेत् ।।२।।

गर्हितान्नाघयोगे च हविष्पान्तीयमभ्यसेत् ।
पवित्रं परमं ह्येतद् ध्यातव्यमप्यभीक्ष्णशः ।।३।।

आदित्ये दृष्टिमास्थाप्य षण्मासान्नियतोऽभ्यसेत् ।
देवयानं स पन्थानं पश्यत्यादित्यमण्डले ।।४।।

विद्या वैश्वानरी चास्य स्वकायस्था प्रकाशते ।
हविष्यान्तीयमभ्यस्य सर्वपापैः प्रमुच्यते ॥५॥

इन्द्रं स्तवेति सूक्तं तु जपेच्छत्रुनिबर्हणम् ।
पवित्राणां पवित्रं तु गुह्यं पावनमद्भुतम् ॥६॥

(२६)

शुक्लपक्षे शुभे वारे सुनक्षत्रे सुगोचरे ।
द्वादश्यां पुत्रकामाय चरुं कुर्वीत वैष्णवम् ॥१॥

दम्पत्योरुपवासस्यादेकादश्यां सुरालये ।
ऋग्भिः षोडशभिः सम्यगर्चयित्वा जनार्दनम् ॥२॥

चरुं पुरुषसूक्तेन श्रपयेत्पुत्रकाम्यया ।
प्राप्नुयाद्वैष्णवं पुत्रमचिरात्सन्ततिक्षमम् ॥३॥

द्वादशैतानि नामानि ऋष्यश्रृङ्गो ऽ ब्रवीन्मुनिः ॥
पूजयेन्मासनामभिः सर्वान्कामान्समश्नुते ॥४॥

आयुष्मन्तं सुतं सूते यशोमेधासमन्वितम् ।
धनवन्तं प्रजावन्तं धार्मिकं सात्त्विकं तथा ॥५॥

(२८)

समिधो ऽ श्वत्थवृक्षस्य हुत्वा ऽग्निं जुहुयात्पुनः ।
उपस्थानं हुताशस्य ध्यात्वाऽर्च्य मधुसूदनम् ॥१॥

हविर्होमं ततः कुर्यात् प्रत्यर्चं वाग्यतः शुचिः ।
सूक्तेन जुहुयादाज्यमादावन्ते च पूर्ववत् ॥२॥

हविःशेषं नमस्कृत्वा नारी नारायणं पतिम् ।
भक्षयित्वा हविःशेषं लब्धाशीः संविशेत्क्षपाम् ॥३॥

ततस्तु कर्म कृत्वेदं कर्तव्यं द्विजतर्पणम् ।
द्वितीया स्त्री निवर्तेत यावद्गर्भं न विन्दति ॥४॥

अपुत्रा मृतपुत्रा वा या च कन्यां प्रसूयते ।
क्षिप्रं सा जनयेत्पुत्रं ऋष्यशृङ्गो यथा ऽ ब्रवीत् ॥५॥

(२९)

(Worship of Vishṇu; till ४२)

अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः ।
यत्कृत्वा मुनयः सर्वे ब्रह्मनिर्वाणमाप्नुयुः ॥१॥

अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिः ॥३॥

आपो ह्यायतनं तस्य तस्मात्तासु सदा हरिः ।
तस्य सर्वगतत्वाच्च स्थण्डिले भावितात्मनाम् ।।४।।

दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम् ।।५।।

आनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता ।
पुरुषो यो जगद्बीजं ऋषिर्नारायणः स्मृतः ।।६।।

(३०)

(The employment of Purusha-sūkta : placement)

नारायण महाबाहो श्रुणुष्वैकमनाः प्रभो ।
वक्ष्ये पुरुषसूक्तस्य विधानं त्वर्चनं प्रति ।।१।।

अग्निकार्यं जपविधिं स्तोत्रं चैव सदात्मकम् ।
स्नात्वा यथोक्त विधिना प्राङ्मुखः शुद्धमानसः ।।२।।

प्रथमं विन्यसेद्वामे द्वितीयं दक्षिणे करे।
तृतीयं वामपादे तु चतुर्थीं दक्षिणे न्यसेत् ।।३।।

सप्तमीं वामजानुनि षष्ठीं वै दक्षिणे न्यसेत् ।
सप्तमी वामकट्यां तु अष्टमीं दक्षिणे कटौ ।।४।।

नवमीं नाभिमध्ये तु दशमीं हृदये न्यसेत् ।
एकादशीं कण्ठदेशे द्वादशीं वाम बाहुके ॥५॥

त्रयोदशीं दक्षिणे बाहावास्ये चैव चतुर्दशीम् ।
अक्ष्णोः पञ्चदशीं चैव षोडशीं मूर्ध्नि विन्यसेत् ॥६॥

(३१)

(The worship sequences)

एवं न्यासविधिं कृत्वा पश्चात्पूजां समारभेत् ।
यथा देहे तथा देवे न्यासं कृत्वा विधानतः ॥१॥

मन्त्रन्यासं पुरा कृत्वा स्वदेहे देवतासु च ।
गायत्र्योंकारं न्यस्ताङ्गः पूजयेद्विष्णुमव्ययम् ॥२॥

उच्छ्वासावाहने नस्तः स्थिरायामुद्भवार्चने ।
अस्थिरायां विकल्पः स्यात्स्थण्डिले तु भवेद् द्वयम् ॥३॥

उच्छ्वासावाहने नस्तः स्थावरे वै यथा तथा ।
शालिग्रामार्चनेनैव ह्यावाहनविसर्जने ॥४॥

शालिग्रामे तु भगवानादिभूतो यथा हरिः ।
न तथा ऽ न्यत्र सूर्यादौ वैकुण्ठे वाऽपि सर्वतः ॥५॥

आद्यया ऽऽ वाहयेद्देवं ऋचा तु पुरुषोत्तमम् ।
द्वितीयया ऽऽ सनं दद्यात्पाद्यं चैव तृतीयया ॥६॥

अर्घ्यं चतुर्थ्या दातव्यं पञ्चम्याऽऽचमनीयकम् ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च ॥७॥

यज्ञोपवीतमष्टम्या नवम्या चानुलेपनम् ।
पुष्पं दशम्या दातव्यमेकादश्या तु धूपकम् ॥८॥

द्वादश्या दीपकं दद्यात् त्रयोदश्या निवेदनम् ।
चतुर्दश्या नमस्कारं पञ्चदश्या प्रदक्षिणम् ॥९॥

स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ।
दक्षिणां यथाशक्त्या षोडश्या तु प्रदापयेत् ॥१०॥

(३२)

ततः प्रादक्षिण्यं कृत्वा जपं कुर्यात्समाहितः ।
यथाशक्ति जपित्वा तु सूक्तं तस्य निवेदयेत् ॥१॥

देवस्य दक्षिणे पार्श्वे कुण्डं स्थण्डिलमेव वा ।
कारयेत्प्रथमेनैव द्वितीयेन तु प्रोक्षणम् ॥२॥

तृतीयेनाग्निमादध्याच्चतुर्थेन समिन्धनम् ।
पञ्चमेनाज्यश्रपणं चरोश्च श्रपणं तथा ॥३॥

षष्टेनैवाग्निमध्ये तु कल्पयेत्पद्ममासनम् ।
अनुज्ञाप्य ततः कुर्यात्सप्तम्यादि यथाक्रमम् ॥५॥

समिधस्तावतीः पूर्वं जुहुयादभिघारितः ।
ततो घृतेन जुहुयाच्चरुणा च ततः पुनः ॥६॥

एवं हुत्वा ततश्चैवानुज्ञाप्य यथाक्रमम् ।
अग्नेर्भगवतस्तस्य समीपे स्तोत्रमुच्चरेत् ॥७॥

(३३)

(Prayer)

य(जि) तं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्ते ऽ स्तु हृषीकेश महापुरुषपूर्वज ॥१॥

देवानां दानवानां च सामान्यमधिदैवतम् ।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ॥२॥

एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा ।
अव्यक्तश्चानुमन्ता च गुणमायासमावृतः ॥३॥

सांसारसागरं घोरमनन्तं क्लेशभाजनम् ।
त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ॥४॥

न ते रूपं न चाकारो नाऽयुधानि न चास्पदम् ।
तथाऽपि पुरुषाकारो भक्तानां त्वं प्रकाशसे ॥५॥

नैव किञ्चित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचित् ।
नैव किञ्चिदसाध्यं ते न च साध्योऽसि कस्यचित् ॥६॥

(३४)

कार्याणां कारणं पूर्वं वचसा वाच्यमुत्तमम् ।
योगिनां परमा सिद्धिः परमं ते पदं विदुः ॥१॥

अहं भीतो ऽस्मि देवेश संसारे ऽस्मिन्महाभये ।
त्राहि मां पुण्डरीकाक्ष न जाने परमं पदम् ॥२॥

कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ।
शरीरे जगतश्चासि वर्तते मे महद्भयम् ॥३॥

त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ।
विज्ञानं यदिदं प्राप्य यदिदं स्थानमर्जितम् ॥४॥

जन्मान्तरे ऽ पि मे देव मा भूदस्य परिक्षयः ।
दुर्गतावपि ज्ञातस्य त्वद्गतो मे मनोरथः ॥५॥

यदि नाशं न विन्देत तावताऽ स्मि कृती सदा ।
कामये विष्णुपादौ तु सर्वजन्मसु केवलम् ॥६॥

(३५)

(Benefits of reciting Purusha-sūkta)

पुरुषस्य हरेः सूक्तं स्वर्ग्यं धन्यं यशस्करम् ।
आत्मज्ञानमिदं पुण्यं योगध्यानमिदं परम् ॥१॥

फलाहारो भवेन्मासं पश्यत्यात्मानमात्मनि ।
फलानि भुक्त्वोपवसेन्मासमद्भिश्च वर्तयेत् ॥२॥

अरण्ये निवसेन्नित्यं जपन्नेतं ऋषिं सदा ।
त्रिस्त्रिषवमकालेषु स्नायादप्सु समाहितः ॥३॥

आदित्यमुपतिष्ठेत सूक्तेनानेन नित्यशः ।
आज्याहुतिरनेनैव हुत्वैतं चिन्तयेदृषिम् ॥४॥

ऊर्ध्वं मासात्फलाहारस्त्रिभिर्वर्षैर्जयेद्दिवम् ।
तद्भक्तस्तन्मना युक्तो दश वर्षाण्यनन्यभाक् ॥५॥

साक्षात्पश्यति तं देवं नारायणमनामयम् ।
ग्राह्ममत्यन्तयत्नेन स्रष्टारं जगतोऽ व्ययम् ॥६॥

(३६)

(Contemplation on Vishṇu)

गृहस्थधर्मे वर्तेत न्यायक्लृप्तः शुचिव्रतः ।
एतं देवं चिन्तयेत नारायणमनामयम् ॥१॥

अर्धरात्रे त्यक्तनिद्र उत्थाय शुचिर्वाग्यतः ।
संप्रसुप्तेषु भूतेषु योगं युञ्जीत योगवित् ॥२॥

ऋज्वासीनः समे देशे निवाते शब्दवर्जिते ।
सव्यं पादं दक्षिणस्य जानुनि श्लेषयेत्ततः ॥३॥

संहृत्य दक्षिणं पादं सव्ये जानुनि यच्छति ।
ब्रह्माञ्जलिकृतः स्वस्थो योगसम्मीलितेक्षणः ॥४॥

ओमित्युक्त्वा स्वं हृदयं चिन्तयेदविशङ्कितः ।
तत्रात्मानं समादध्यादिन्द्रियाणि मनस्तथा ॥५॥

(३७)

न चेद् बुद्ध्येत किञ्चान्यन्न पश्येच्छृणुयान्न च ।
न मनस्येद्यदा योगं तदा प्राप्तः स उच्यते ॥१॥

हृद्येतमृषिमभ्यसेत्पश्यन्निव यथाश्रुति ।
प्राणानायम्य चासीनो यावत्तं चिन्तयेदृषिम् ॥२॥

उच्छ्वसिष्यन्नधो नाभिं गमयित्वा मनस्तथा ।
उच्छ्वसेदेवमसकृत्तन्मना योगमुन्नयेत् ॥३॥

एवं हि युञ्जन्त्सामान्यं न पश्येच्छृणुयान्न च ।
तदा शनैर्नयेच्चेतो हृदयादूर्ध्वमेव तु ॥४॥

समौ तु जत्रू चास्यं च नासिकानयने भ्रुवौ ।
भ्रुवोर्मध्ये परं स्थानं तत्रैतद्धारयेत्स्थिरम् ॥५॥

(३८)

ललाटदेशे धार्याथ मूर्धानं गमयेत्ततः ।
उच्छ्वसंश्च यथाकालं नाभिं गत्वोच्छ्वसेत्पुनः ॥१॥

एतत्परं स्थानमुक्तं ब्रह्मणः परमात्मनः ।
एवं युक्तो महात्मानमात्मानं प्रतिपद्यते ॥२॥

यदि स्यात्सुकृती शुद्धो यदि वा पापकृत्तमः ।
उपलभ्य परं ब्रह्म गतिं ज्ञात्वा भवेच्छुचिः ॥३॥

सर्वपापानुबद्धश्चेद् बुध्द्वैतत्प्रयतो जपेत् ।
अभिजिज्ञासनादेव गच्छेत परमां गतिम् ॥४॥

धारणा तु पृथक् कार्या धर्मेणानेन नित्यशः ।
आदित्ये ऽग्नौ चन्द्रमसि वृक्षाग्रेषु च धारयेत् ॥५॥

(३९)

पर्वताग्रे समुद्रे वाऽपि यत्र वाऽपि मनो रमेत् ।
न त्वेव विषयान्प्राप्य धारयीत कथंचन ॥१॥

बह्वत्र दुःखं जानीयात् प्रध्वंसे धारणाकृते ।
धार्मिकानां कुले ऽ शुद्धे योगभ्रष्टो ऽ भिजायते ॥२॥

मूर्ध्नि ब्रह्म यदा विन्देत् तमेव ऋषिसत्तमम् ।
तदा मूर्ध्नः परं ज्योतिर्नक्षत्रपथमुन्नयेत् ॥३॥

योगी योगेश्वरं प्राप्य निर्द्वन्द्वः परमात्मवित् ।
सर्वत्रैवात्मना ऽऽ त्मानं पश्येदृषिपरायणः ॥४॥

जपेच्चैव सदा स्नातः पवित्रमिदमुत्तमम् ।
अपि पातकसंयुक्तः कालेन सुकृती भवेत् ॥५॥

(४०)

तपः परायणो नित्यं सत्यवागनसूयकः ।
जपन्नेतं ऋषिं विप्रः कालेन सुकृती भवेत् ॥१॥

येन येन च कामेन जपेदिमं ऋषिं सदा ।
स स कामः समृद्धः स्याच्छ्रद्दधानस्य कुर्वतः ॥२॥

होमं वाऽप्यथ वा जाप्यमुपहारमथो चरुम् ।
कुर्वीत येन कामेन तत्सिद्धिमवधारयेत् ॥३॥

ज्ञातिश्रैष्ठ्यं महद्वित्तं यशो लोके परां गतिम् ।
ज्ञानेन विप्रमेक्षं च तत्सिद्धिमवधारयेत् ॥४॥

ज्ञानगम्यं परं सूक्ष्मं व्याप्य सर्वमवस्थितम् ।
ग्राह्यमत्यन्तयत्नेन ब्रह्माभ्येति सनातनम् ॥५॥

सहस्रशीर्षेति सूक्तं सर्वकामफलप्रदम् ।
वेदगर्भशरीरेण स वै नारायणः स्मृतः ॥६॥

ब्रह्मेन्द्ररुद्रपर्जन्या अत्र सूक्ते व्यवस्थिताः ।
अत्रस्थमेतद्द्रष्टव्यं जगत्स्थावरजङ्गमम् ॥७॥

(४१)

अनासादयमानोऽपि भक्तिं न परिहापयेत् ।
भक्तानुकम्पी भगवान् श्रूयते पुरुषोत्तमः ॥१॥

पूजार्थं तस्य देवस्य वन्यान्स्वयमुपार्जितान् ।
आरण्यकविधानेन निर्वपेत्प्रत्यहं चरुम् ॥२॥

नारायणाय स्वाहेति मन्त्रान्ते जुहुयाद्धविः ।
आ सहस्रात्ततश्चक्षुर्दिव्यं होतुर्ददाति सः॥३॥

अपि वा चरुसहस्रं तन्त्रेणैकेन निर्वपेत् ।
यावन्तो वाऽपि शक्यन्तेऽह्ना सर्वान्त्समापयेत् ॥४॥

सहस्रस्येप्सितानां च कामानां लभते फलम् ।
पुरुषायुः समायुक्तः सिद्धो वाऽपि चरेन्महीम् ॥५॥

(४२)

(Vishṇu or Purusha as the spirit of the Sun)

ध्येयः सदा सवितृमण्डलमध्यवर्ती ।
नारायणः सरसिजासनसंनिविष्टः ।
केयूरवान्मकरकुण्डलवान्किरीटी ।
हारी हिरण्मयवपुर्धृतशंखचक्रः ॥१॥

एतत्तु यः पठति केवलमेव सूक्तम्
नारायणस्य चरणावभिवन्द्य वन्द्यौ ।
पाठेन तेन परमेण सनातनस्य
स्थानं जरामरणवर्जितमेति विष्णोः ॥२॥

हविषाऽग्नौ जले पुष्पैर्ध्यानेन हृदये हरिम् ।
यजन्ति सूरयो नित्यं जप्येन रविमण्डले ॥३॥

बिल्वपत्रं शमीपत्रं पत्रं भृङ्गारकस्य च ।
मालतीकुशपद्मं च सद्यस्तुष्टिकरं हरेः ॥४॥

यन्नोपपद्यते किञ्चित्तं ध्यायेन्मनसैव तु ।
सम्पद्यते प्रसादात्तु देवदेवस्य चक्रिणः ॥५॥

पत्रैश्च पुष्पैश्च फलैश्च तोयै
रक्रीतलब्धैश्च सदैव सत्सु ।
भक्त्यैकलभ्ये पुरुषे पुराणे
मुक्त्यै किमर्थं क्रियते न यत्नः ॥६॥

इत्येवमुक्तः पुरुषस्य विष्णो-
रर्चाविधिः विष्णुकुमारनाम्ना
मुक्त्यैकमार्गप्रतिबोधनाय
दृष्ट्वा विधानं त्विह नारदोक्तम् ॥७॥

या ओषधीः स्वस्त्ययनं जपेत नियतव्रतः ।
ओषधीश्च यजेन्नित्यं षण्मासानेव नित्यशः ॥८॥

॥इत्यृग्विधाने तृतीयोऽध्यायः ॥

अथ चतुर्थोऽध्यायः ॥

॥ॐ॥

(१)

इष्ट्वा शरदि वै रुद्रमोषधीश्च यजेत्तथा ।
तस्याऽमया न भवन्ति तथा ऽ जीर्णानि यानि च ॥१॥

क्रियां तु सप्तरात्रेण सप्तकृत्वो ऽ भ्यसेत्ततः ।
प्रपद्येतौषधीं विप्रः सूक्तमेतज्जयन्त्सदा ॥२॥

'द्विषट्क्षेत्रादिहायध्वं' इति विज्ञापयीत च ।
स्वक्षेत्रे वरुणमिष्ट्वा विन्दते भिषगोषधीः ॥३॥

वृष्टिकामो यताहारः प्रपद्येत बृहस्पतिम् ।
पायसेनोपहारेण होमेन च समन्वितः ॥४॥

बृहस्पते प्रतीत्येपद् वृष्टिकामः प्रयोजयेत् ।
पर्जन्यं च नमस्कृत्वा वृष्टिं विन्दति शोभनाम् ॥५॥

(२)

सर्वत्र तु परा शान्तिर्ज्ञेयोऽ प्रतिरथस्त्वृषिः ।
यमेव देशं गच्छेत शत्रुं वा ऽ प्यनुमन्त्रितः ॥१॥

नाजित्वा विनिवर्तेत परं हि ब्रह्मणो बलम् ।
सर्वकामैर्जपेदेतत्सर्वकामसमृद्धये ॥२॥

संग्राममभ्युदयाय राज्ञे चैतत्प्रयोजयेत् ।
सर्वान्विजयते शत्रून्न पराजीयते ऽ परैः ॥३॥

पथि स्वस्त्ययनं चैतत्तस्करेभ्यश्च चरन्पथि ।
भूतोरगपिशाचेभ्यः सर्वेभ्यः परिरक्षति ॥४॥

भूतांशस्य ऋषेः सूक्तं प्रजाकामः शुचिर्जपन् ।
अनुरूपां प्रजामाशु लभते नात्र संशयः ॥५॥

(३)

स्थालीपाकेन नासत्यावश्विनौ तु यजेद् द्विजः ।
अनेनैवोपचारेण हुत्वाऽ श्वाननुमन्त्रयेत् ॥१॥

पायसं कृशरामांसंमोदनं दधिसक्तुकान् ।
कुल्माषांश्च करम्भांश्च फलानि विविधानि च ॥२॥

चित्रं माल्यं शुभान्गन्धानन्नपानानि यानि च ।
भक्ष्यं भोज्यं च पेयं च समाहन्योदिते रवौ ।।३।।

भूतांशमभ्यसेत्तावद्यावदस्तमितो रविः ।
अर्धरात्रे त्वतिक्रान्ते ततोऽश्विभ्यां निवेदयेत् ।।४।।

दीर्घायुषं सुरूपं च लभते पुत्रं सुवर्चसम् ।
रूपवांश्च भवेन्नित्यं भूतांशं योऽभ्यसेत्सदा ।।५।।

(४)

सर्वकामिकमित्येतमृषिं विद्याद्विचक्षणः ।
न वा उ देवा इत्येतज्जपेत नियतव्रतः ।।१।।

अन्नं विन्दति सर्वत्र यत्र यत्रोपतिष्ठति ।
पाप्मोपहतमात्मानं यो मन्येत विचक्षणः ।।२।।

स जपेन्नियतो भूत्वा लघु मन्येत पाप्मना ।
वाचं प्रपद्येद्वाक्कामो जुह्वदाशु जपन्निमाः ।।३।।

अहं रुद्रेभिरित्येतद्वाङ्मी भवति पूजितः ।
न तमित्यष्टकं सूक्तं वैश्वदेवं जपेन्मुनिः ।।४।।

कृत्स्नं तु कल्मषं हित्वा विश्वैर्देवैः स हासते ।
रात्रीं प्रपद्येत सदा शुचिश्चीर्णव्रतो निशि ॥५॥

यः कामयेत न पुनर्जायेयमिति योनिषु ।
सहस्रकृत्वो मनसा जपेद्रात्री तु रात्रिषु ॥६॥

स्थालीपाकेन रात्रीं च यजेताहरहर्निशि ।
तन्मना निशि चासीनस्तिष्ठेदहनि धार्मिकः ॥७॥

(५)

ऊर्ध्वं संवत्सराच्चैव चरुं पयसि संस्कृतम् ।
सहस्रकृत्वस्त्वेतेन दिवा होमो विधीयते ॥१॥

जुहुयान्निशि पूर्वस्मिन् रात्रिभागे समाहितः ।
दिवा चावश्यकं कार्यं छाययामंशुतेजसा ॥२॥

इति प्रयत आत्मवान्त्सूक्तं तु मनसा जपेत् ।
संवत्सरे तृतीये तु सर्पिषा साधयेच्चरुम् ॥३॥

अथास्य वरदा देवी रात्रिर्भवति शर्वरी ।
विज्ञापयीत तां देवीं वरदां स्वयमागताम् ॥४॥

संवत्सर ऋतौ मासि दिवसेऽस्मिन्क्षणेऽपि वा ।
प्रयाणकालो भविता तव वत्सेति वत्सला ॥५॥

(६)

रात्रीसूक्तं जपन्नेव तं कालं प्रतिपद्यते ।
न योनिं पुनरायाति सर्वपापैः प्रमुच्यते ॥१॥

ममाग्ने वर्च इत्येतत्सर्वकामैर्जपेद् द्विजः
जुहुयादाज्यमनयैव सर्वान्कामानवाप्नुयात् ॥२॥

यं कल्पयन्तीति सदा जपेत नियतव्रतः ।
नैनं कृत्या निहिंसन्ति क्रुद्धाभिचरितानि च ॥३॥

यमाङ्गिरसकल्पैस्तु तद्विधोऽभिचरन्ति सः ।
प्रत्यङ्गिरसकल्पेन सर्वांस्तान्प्रतिबाधते ॥४॥

प्रत्यङ्गिरस विद्वांस्तु न रिष्येत कदाचन ।
नैनं कृत्या निहिंसन्ति ज्ञाताज्ञातानि यानि च ॥५॥

(७)

अजानता जानता वा क्रुद्धेनामर्षितेन वा ।
आक्रुष्टं वा दुरुक्तं वा नैनो लिम्पति तद्विदम् ॥१॥

एतमेव जपेन्नित्यमृषिं स्वस्त्ययनाय वै ।
सर्वप्रायश्चित्तमेतदभाषत ऋषिः स्वयम् ॥२॥

स्थावराणां निवेशे तु नगराणां तथैव च ।
ग्रामाणां च गृहाणां च जपेदिदमृषिं सदा ॥३॥

जापरूपमयं विद्वान्कारयेत् त्रिवृतं मणिम् ।
सहस्रसम्पातहुतं ऋषिणा तेन तं ततः ॥४॥

प्रतिमुञ्चेत शिरसि ग्रीवायामथ वोरसि ।
नैनं कृत्या निहिंसन्ति ज्ञाताज्ञातानि यानि च ॥५॥

(८)

अनेनैव तु सूक्तेन राज्ञां च समलोहितम् ।
कारयेत मणिं विद्वांस्तावदेवानुमन्त्रणम् ॥१॥

संग्रमेषु ध्वजाग्राणि वादित्राण्यनुमन्त्रयेत् ।
आसनानि च शय्याश्च यानानि विविधानि च ॥२॥

तस्याभिचरतः साक्षादङ्गिरसोऽ प्यृषेः स्वयम् ।
प्रत्यङ्गिरसकल्पेन सर्वं तत्प्रतिबाधते ॥३॥

अमानुषीरभिचरेत्कृत्यासूक्तं जपन्निदम् ।
मुच्यते सर्वतोऽ निष्टात् किं पुनर्मानुषाद्भयम् ।।४।।

तपस्वी नियतो दान्तः प्रयोक्ता चेद्धवेदृषिम् ।
सर्व तरति शान्तात्मा तपो हि सुमहद्-बलम् ।।५।।

(९)

आयुष्यमायुर्वर्चस्यं सूक्तं दाक्षायणं महत् ।
अलङ्कारं हिरण्यं वा प्राप्य दाक्षायणं जपेत् ।।१।।

प्रायश्च श्रियमादत्ते बहु चान्नं समश्नुते ।
भाववृत्ते परे सूक्ते सप्तर्चे पावने जपेत् ।।२।।

प्रजापतिं नमस्कृत्वा सर्वान्कामानवाप्यते ।
नासदासीदिति जपेज्जुहुयाद्योगतत्परः ।।३।।

प्रजापतेस्तु सायोज्यं द्वादशाब्दैः समश्नुते ।
उत देवा इति जपेदामयावी यतव्रतः ।।४।।

घृतकुम्भं निधायाथ जुहुयाज्जातवेदसि ।
कुम्भात्संपातमन्यस्मिन्कांस्ये पात्रे निधापयेत् ।।५।।

यन्न पानं न चान्नं स्यात्स इदं संप्रकल्पयेत् ।
तेनाज्येनाङ्गमाभ्यज्य शनकैरन्नभाग्भवेत् ॥६॥

रोगार्तस्याप्यनेनैव गात्रमङ्क्त्वा जपेदिदम् ।
अजीर्णान्नो ऽ प्यञ्जयीत सुखं भवति तेन ह ॥७॥

(१०)

अग्ने अचा वदत्येतद्धनकामः प्रयोजयेत् ।
नियतः सर्पिषा हुत्वा जपेदयुतशः पुनः ॥१॥

खादिरीणां हि समिधं जुहुयाद्दशतीर्दश ।
दशकृत्वः सदारेण रायस्पोषेण पुष्यति ॥२॥

बिल्वोदुम्बरपालाशीस्तथा रौहितकीश्च याः ।
जुहुयाद्धनकामस्तु रायस्पोषेण पुष्यति ॥३॥

बैभीदकेध्मो बैल्वकीर्जुहुयादर्धमासभुक् ।
द्विषद्द्वेषेण तस्यान्ते सूक्तमेतत्प्रयोजयेत् ॥४॥

द्विषन्तं धनिनं हत्वा द्विषतो विन्दते धनम् ।
अथवा जाप्यमेव स्याद्रायस्पोषधनार्थिना ॥५॥

(११)

अयमग्ने जरितेति जपेदग्निभये सति ।
विधिना तर्पयित्वाऽग्निं पयोदधिघृतादिभिः ॥१॥

स्वयं पातुं यावदिच्छेत्तावद्दत्वा चतुर्दिशम् ।
अपामिदं परिणयेत्सन्ततोदकधारया ॥२॥

उदह्रद इव भूत्वा अग्नेर्भेषजमन्तिकात् ।
अरण्यमेत्य पाटां तु क्रीणीयाद्यवमुष्टिना ॥३॥

यदि सौम्यसि सोमाय त्वा परिक्रीणाम्योषधिम् ।
यदि वारुण्यसि वरुणाय त्वा परिक्रीणाम्यहं ततः ॥४॥

वसुभ्योऽथवा रुद्रेभ्य आदित्येभ्योऽथ वा पुनः ।
वैश्वदेव्यसि विश्वेभ्यः परिक्रीणाम्यहं ततः ॥५॥

क्षिप्त्वा सुमनसः पूर्वमोषध्या सह वीरुधैः ।
तस्या वीर्यं समादत्ते कर्म यत्र करिष्यति ॥६॥

तां तु मध्ये निदधीत ओषधीनां विहायसि ।
ग्रहणे त्वौषधीनां तु सर्वत्रैष विधिर्भवेत् ॥७॥

(१२)

उत्खापयीत तां पाटां त्वामिमामिति जपन्निह ।
प्रातश्च पेषयेदेनां संसदि ब्रह्मचारिणा ॥१॥

तदलाभे व्रतवता कन्यया ब्राह्मणेन वा ।
प्रातः शुचिस्तां घृतेन त्रिः पिबेदनुमन्त्रिताम् ॥२॥

इमामिति तु सूक्तेन शतकृत्वो दशावरम् ।
सपत्नीं बाधते तेन पतिश्चातीव मन्यते ॥३॥

पतिस्तु परिजप्यैनां पाटामेतेन वै पिबेत् ।
पयसा सप्तरात्रं तु सपत्नान्प्रतिबाधते ॥४॥

मूलमन्त्रजपैरन्यैर्या पतिं जेतुमिच्छति ।
अलोका यमलोकस्था मज्जते नरके हि सा ॥५॥

(१३)

अन्यथा वोपनीतानि चूर्णमूलौषधान्यपि ।
विनाशयेयुः पुरुषं तस्मान्नान्यं समाचरेत् ॥१॥

प्रियंवदा भर्तरि या भर्ता यस्याः परायणम् ।
वाक्चैव मधुरा यस्याः पत्युःसंवननं महत्॥२॥

प्रियं भर्तारमासाद्य पिबेदेवौषधीमिमम् ।
प्रियंवदां धर्मपरां धर्मपत्नीमनिन्दिताम् ॥३॥

अवमन्येत यो मोहात्तमाहुः पुरुषाधमम् ।
अरण्यानीत्यरण्येषु जपेत्सूक्तमनेकशः ॥४॥

अरण्यानीं नमस्कृत्वा सोऽरण्यात्प्रतिमुच्यते ।
श्रद्धासूक्तं जपेन्नित्यं श्रद्धाकामः समाहितः ॥५॥

(१४)

सर्वत्र लभते श्रद्धां मेधासूक्तं तथैव च ।
ब्राह्मीमासाद्य सूक्ते द्वे जपेत नियतव्रतः ॥१॥

तां पिबेत्तु यथाशक्त्या त्र्यहात्सिद्धिं नियच्छति ।
शंखपुष्पीं तु पयसा ब्राह्मीपुष्पाणि सर्पिणा ॥२॥

शतावरीं तु पयसा वचामद्भिर्घृतेन वा ।
सूक्ताभ्यामनुमन्त्र्याभ्यांमेकैकां तु त्र्यहं पिबेत् ॥३॥

श्रद्धां मेधां स्मृतिं पुष्टिं बलं लक्ष्मीं च विन्दति ।
सिद्धिं प्राप्नोति च परां दीर्घं चायुः समश्नुते ॥४॥

अथवा मनसा ध्यायेत्सूक्ते सिद्धिं नियच्छति ।
शास इत्था सपत्नघ्नं संग्रामं विजिगीषतः ॥५॥

(१५)

प्रयोक्तव्यं तु शुचिना जुहुयात्तत्र सिद्धये ।
अथवा जप्यमेव स्यात्सँग्राममभिगच्छतः ॥१॥

शास इत्थेति यो हन्तुं शत्रून्सर्वान्निवारयेत् ।
अलक्ष्मीनाशनार्थं तु जपेन्नित्यं शिरिम्बिठम् ॥२॥

अपामार्गमयीं शाखां सदर्भां सहवीरणम् ।
गृहीत्वाऽऽत्मानं पावयेदधश्चोर्ध्वं च नित्यशः ॥३॥

आज्यां चानेन जुहुयात्सहस्रं दशतीर्दश ।
त्र्यहेण नुदते देहादलक्ष्मीं शतवार्षिकीम् ॥४॥

चान्द्रायणं चरन्नेतत्सूक्तं सिद्धिकरं जपेत् ।
अलक्षमीं नुदते देहादपि वर्षसहस्रिकीम् ॥४॥

(१३)

गृहीतं यक्ष्मणा दर्भान्गृहीत्वा संस्पृशन् जपेत् ।
मुञ्चामि त्वा हविषेति यक्ष्माणमपकर्षति ॥१॥

समिद्धमग्निं जुहुयादाज्येनैव यथाविधि ।
सम्पातमाज्ये निनयेत्सम्पांतैश्च पयः पिबेत् ॥२॥

सम्पातभाजने सर्पिश्चूर्णं तत्र निधापयेत् ।
तत्रास्य भोजनीयं स्यात्पानीयं चानुमन्त्रितम् ॥३॥

खादिराणि तु काष्ठानि चूर्णं कृत्वा सहाम्बुभिः।
साधयीत रसं चैषां मध्वाज्याभ्यां पिबेत्सह ॥४॥

मुञ्चामि त्वा हविषेति तत्र तत्र प्रयोजयेत् ।
यक्ष्माणमपकर्षति शरीरात्तेन कर्मणा ॥५॥

(१७)

यस्य गर्भः प्रमीयेत तत्राग्नौ जुहुयाद्धविः ।
ब्रह्मणाग्निः सं विदान इत्याज्येन यथाविधि ॥१॥

आज्यशेषेण चाभ्यज्य गर्भिणी प्रसवेत्ततः ।
पिबेदेवाज्यशेषं तु जीवंस्तस्याः प्रजायते ॥२॥

जातानि चेत्प्रमीयेरन्नाज्यं कृत्वाऽ नुमन्त्रितम् ।
ब्रह्मणाऽग्निरिति हुत्वा सम्पातान्निनयेन्मणौ ॥३॥

मणिं तु त्रिवृती सूत्रे वासयेद्वाससा सह ।
न्यग्रोधशुङ्गया तत्र शुक्ललोहितवेष्टितम् ॥४॥

तं सावित्र्ययुतेनाथानुमन्त्र्य यथाविधि ।
सम्पातैरयुतेनैव ब्रह्मणेति च संस्तुतम् ॥५॥

(१८)

उपरिष्टयाच्च सावित्र्या तावदेवानुमन्त्रणम् ।
सर्वैः स्वस्त्ययनैश्चैतज्जपेदभिहुतं मणिम् ॥१॥

शिरसा धारयेन्नारी प्रयता गर्भिणी सती ।
तृतीये गर्भमासे तु मणिमेतं समासजेत् ॥२॥

पुष्यन्ती शरदं नारी गौः सवत्सा वसेद्यथा ।
बहुपानीययवसा वत्सेन पिबता सह ॥३॥

जातस्य तु कुमारस्य कण्ठे तं मणिमासजेत् ।
आज्यशेषं पुरस्कृत्य तमभ्यज्य कुमारकम् ॥४॥

हुत्वा स्वस्त्ययनैरेव स्त्री पुमांसं प्रसूयते ।
ऊर्ध्वं वर्षात्स्वस्त्ययनं पुनरेव विधीयते ॥५॥

(१९)

पुरस्तनप्रदानात्तं श्रद्धासूक्तेन पाययेत् ।
मेधासूक्तेन चैवैनं पिष्टं व्रीहिमयं चरुम् ॥१॥

मधुमिश्रं जातरूपं मेधावी तेन जायते ।
शतं वर्षाणि जीवेत म्रियते न पुराऽऽयुषः ॥२॥

स्मृतमेव च तस्य स्यात्षण्मासाच्च ततः परम् ।
आज्यं संस्कृत्य जुहुयादक्षीभ्यां त इति द्विजः ॥३॥

पाणिना तु घृताक्तेन मूर्धानं संस्पृशेत्ततः ।
कर्णौ नेत्रे च चुबुकं नासिके चैव संस्पृशेत् ॥४॥

एतदेव जपेन्नित्यं यक्ष्मणो विप्रमुच्यते ।
पूर्वोक्तेनैव कल्पेन यक्ष्मनाशनमाचरेत् ॥५॥

(२०)

होमेन च जपैश्चैव यक्ष्मनाशनमाचरेत् ।
अपेहीति जपेत्सूक्तं शुचिर्दुःस्वप्ननाशनम् ॥१॥

देवाः कपोत इति तु कपोतस्योपवेशने ।
सूक्तेन जुहुयादाज्यं यमदूतं हि तं विदुः ॥२॥

सपत्नघ्नं प्रयुञ्जीत ऋषभं जपहोमयोः ।
येनेदमिति वै नित्यं जपेत नियतव्रतः ॥३॥

समाधिं मनसस्तेन विन्दते नैव मुह्यति ।
मयोभूर्वात इति तु गवां स्वस्त्ययने जपेत् ॥४॥

यवांश्चैव घृताभ्यक्तान्कारीषेऽग्नौ समाहितः ।
जुहुयाद् गोष्ठमध्ये तु दधिमध्वाज्यसंस्कृतान् ॥५॥

(२१)

(Consecration of King)

राजानमभिषिञ्चेत तिष्येण श्रवणेन वा ।
पौष्णसावित्र सौम्याश्विरोहिणीषूत्तरासु वा ॥१॥

हुत्वाऽग्निं राजलिङ्गाभिः सावित्र्या प्रयतः शुचिः ।
महाव्याहृतिभिश्चैव सम्पाताभिभूतो भवेत् ॥२॥

सर्वौषधिरसैः श्लक्ष्णैर्नदीनां सलिलेन च ।
व्याघ्रचर्मण्यथासीनमासन्द्यामभिषिच्य तम् ॥३॥

तिष्ठन्प्रत्यङ्मुखो ब्रूया'ज्जय त्वं पृथिवीमिमाम् ।
धर्मस्ते निखिलो राजन्वर्धतां पालय प्रजाः ॥४॥

वर्धस्व त्वं श्रियै पुष्ट्यै जयायाभ्युदयाय च (धर्माय विजयाय च) ।
राजानः सन्तु ते गोत्रे' ततोऽप्रतिरथं जपेत् ॥५॥

(२२)

वैयाघ्रं तु भवेच्चर्म समिदौदुम्बरी भवेत् ।
त्रिरेनमभिषिच्यैवं दुन्दुभीनभिमन्त्रयेत् ॥१॥

'प्राच्यां त्वा दिशि वसवोऽभिषिञ्चन्तु तेजसा ।
दक्षिणस्यां त्वा दिशि रुद्रा अभिषिञ्चन्तु पुष्टये ॥२॥

प्रतीच्यां त्वा दिश्यादित्या अभिषिञ्चन्तु पुष्टये ।
विश्वे देवा उदीच्यां तु अभिषिञ्चन्तु श्रेयसे'॥३॥

अभिषिच्य च राजानमाशीर्भिरभिनन्द्य च ।
आ त्वाहार्षमन्तरे धीत्यथैनमभिमन्त्रयेत् ॥४॥

पतङ्गमिति नित्यं तु जपेदज्ञानभेदनम् ।
मायाभेदनमेतद्धि सर्वमायाः प्रबाधते ॥५॥

(२३)

(Aghamarshaṇa-Japa)

शाम्बरीमिन्द्रजालं वा मायामेतेन वारयेत् ।
अदृष्टानां च सत्त्वानां मायामेतेन बाधने ॥१॥

त्वं ऊ ष्विति स्वस्त्ययनं जपेत नियतव्रतः ।
पुष्पं दृष्ट्वा तु या गर्भं न गृह्णीयाद्व्योन्विता ॥२॥

'विष्णुर्योनिं' 'नेजमेष' योनिं स्पृष्ट्वा ततो जपेत् ।
महि त्रीणमवोऽस्त्विति पथि स्वस्त्ययने जपेत् ॥३॥

प्राग्नयेऽथ द्विषद्द्वेष्यं जपेद् द्वेषस्य निष्कृतिम् ।
आऽयंगौः सार्पराज्ञीस्तु सर्पनितेन बाधते ॥४॥

पवित्राणां पवित्रं तु जपेदेवाघमर्षणम् ।
अपः प्रविश्य यच्चैतत् त्रिः पठेत्सुमाहितः ॥५॥

(२४)

यथाऽश्वमेधावभृतस्तादृशं मनुरब्रवीत् ।
अप्सु चैव निमज्जित्वा त्रिः पठेदघमर्षणम् ॥१॥

यथाऽ श्वमेधावभृत एवं तदृषिरब्रवीत् ।
यथाऽ श्वमेधः क्रतुराट्सर्वपापापनोदनम् ॥२॥

तथाऽघमर्षणं सूक्तं सर्वपापापनोदनम् ।
सेनादारणमेतत्स्यान्नैर्हस्त्यमिति शौनकः ॥३॥

मनसा ध्येयमेतत्तु मन्यते शौनकस्तृषिः ।
सं सं इद् युवसे वृषन्सौभ्रातृकरणं महत् ॥४॥

ज्ञातिभेदे प्रयुञ्जीत न भिद्यन्ते कदाचन ।
कृते भेदे तु संज्ञानमेतत्सन्धिकरं जपेत् ॥५॥

न तत्र भेदो भूयः स्याद्यत्रैतत्सततं जपेत् ।
तच्छंयोरावृणीमह इति स्वस्त्ययनं जपेत् ॥६॥

(२५)

महानाम्न्यः परं ब्रह्म शुक्रं ज्योतिः सनातनम् ।
सपत्न्यघ्न्यश्च पुण्याश्च पावमान्यः परा स्मृताः ॥१॥

वृष्टिकामो जपेच्चैता आपो हि ष्ठाः सनातनाः ।
ओंकारपूर्वा व्याहृतयो मधुच्छन्दस आदितः ॥२॥

सूक्तान्यन्ते महानाम्न्यः संहिता साऽमृता स्मृता ।
अमृतत्वं ययुर्देवाः पूर्वं संहितयाऽनया ॥३॥

जपन्नेतं शुचिर्नित्यममृतत्वं स गच्छति ।
अत्रैव त्वावपेन्मध्ये पितृसूक्तान्यनेकशः ॥४॥

पित्र्यां तां संहितां विद्यात् पितॄन्प्रीणाति चैतया ।
एवमेव समाहृत्य वासवी संहिता भवेत् ॥५॥

रौद्राऽऽदित्या वैश्वदेवी यद्देवत्यां च कामयेत् ।
कुर्वीत वास्तुशमनं मध्ये गोष्ठस्य धर्मवित् ॥६॥

(२६)

पुष्पैर्गन्धैश्च माल्यैश्च वानस्पत्यैस्तथौषधैः ।
वास्तु सर्वं प्रतिकिरेत्सप्तधान्यैस्तथैव च ॥१॥

वास्तोष्पतिं यजेच्चात्र पायसेन बृहस्पतिम् ।
औदुम्बरपालाशैस्तु बलिं प्रतिदिशं हरेत् ॥२॥

सूर्यो वायुर्यमः पितरो वरुणो निरृतिस्तथा ।
सोमो महेन्द्र इत्येते दिक्षु वै देवता स्मृताः ॥३॥

दद्याद्दानं ब्राह्मणेभ्यः शिवं भवति वास्तुनि ।
प्रतिसंवत्सरं कार्यं गृहे वै गृहमेधिना ॥४॥

यद्येवं सविधं चान्यदनुक्तमपि किञ्चन ।
अग्निमिन्द्रमथो वायुं सूर्यमन्यश्च देवताः ॥५॥

(२७)

आरिराधयिषुर्यां यांमभिधावेत तां च ताम् ।
अभिरूपेण सूक्तेन यथाऽऽदिष्टं प्रयोजनम् ॥१॥

ऋषीणां मन्त्रदृष्टेन प्रत्यक्षा सिद्धिरिष्यते ।
(ऋषिभिर्मन्त्रदृग्भिस्तत्कर्तव्यं कर्मसिद्धये)
सर्वत्र दक्षिणां दद्याद्धनं वा कर्मसिद्धये ॥२॥

न त्वेवादक्षिणं कर्म किंचिदस्तीति शौनकः ।
शक्त्या हि पूर्णपात्रेण सम्मिताऽप्यन्ततो भवेत् ॥३॥

तस्मात्स्वल्पाऽपि दातव्य दक्षिणा कर्मसिद्धये ।
ऋषभैकादशा दद्याद्येन वा तुष्यते गुरुः ॥४॥

धर्मज्ञे सत्यवादिनि ब्रह्मदानं च दीयते ।
तदिदं परमं ब्रह्म गुह्यं पावनमद्भुतम् ॥५॥

नाप्रशान्ताय दातव्यं नापुत्रायातपस्विने ।
नासंवत्सरोषिताय नाशिष्यायानाहिताय च ॥६॥

नमः शौनकाय ॥ नमः शौनकाय॥

॥ इत्यृग्विधाने चतुर्थोऽध्यायः ॥

अथ पञ्चमोऽधयाय: ॥

(१)

(Phala-stuti of Ṛgvidhāna)

नराणां भाग्यहीनानां ऋग्विधानमजानताम् ।
ऋग्वेदः कल्पवृक्षोऽयं फलं नैव प्रयच्छति ॥१॥

रत्नगर्भ इवावास ऋग्वेदः प्रतिभाति मे ।
ऋग्विधानप्रदीपेन विना नैव प्रकाशते ॥२॥

रत्नाकर इवोदार ऋग्वेदोऽत्यन्तदुस्तरः ।
ऋग्विधान महापोतं विना नैव फलप्रदः ॥३॥

निधानं सर्वरत्नानां ऋग्वेदो ब्रह्ममन्दिरम् ।
ऋग्विधानविधानेन ध्रुवमेतदवाप्यते ॥४॥

ऋग्वेदः पठितो ह्येष नृणां भवति निष्फलः ।
ऋग्विधानं विना तस्मादध्येयं तत्प्रयत्नतः ॥५॥

(२)

सूक्ततत्त्वार्थकथनं ऋग्विधानमवैति यः ।
ऋग्वेदो जायते तस्य प्रसादोत्फुल्लमानसः॥१॥

आयुष्यं सम्पदो मूलं सकल्मषनाशनम् ।
ऋग्विधानाभ्यनुष्ठानं शुभ्रं कीर्तिकरं परम् ॥२॥

ऋग्विधानेन संयुक्तं ऋग्वेदं वेत्ति यो द्विजः ।
धर्मार्थकाममोक्षणामाचार्यः स भवेद् ध्रुवम् ॥३॥

वेदेषु प्रथमो वेद आयुर्वेदनिधिः प्रभुः ।
ऋग्विधानसदभ्यासादतीव परितुष्यति ॥४॥

शत्रूणां शमनं तुष्टिं सुहृज्जनसमागमान् ।
ऋग्वेदः प्रयन्ता नित्यं ऋग्विधानेन तोषितः ॥५॥

(३)

ऋग्वेदं वेत्ति यः ऋग्विधानरतः सदा ।
मनोरथादप्यधिकं भवेत्तस्य समीहितम् ॥१॥

कुले जन्मनि शीले वा प्रज्ञायामुद्यमे पुनः ।
ऋग्विधानपरिज्ञानादुशन्ति चरितार्थताम् ॥२॥

विशन्ति देवताः सर्वाः सम्पद्यन्ते विभूतयः ।
दुराधयः प्रणश्यन्ति नित्यं ऋग्विधिपाठिनाम् ॥३॥

॥ नमः शौनकाय ॥ नमः शौनकाय ॥

॥ इत्यृग्विधाने पञ्चमोऽध्यायः ॥

श्रीरस्तु ॥ कल्याणमस्तु ॥

॥ ऋग्विधानं समाप्तम् ॥